5

CHUNILAL GANDHI VIDYABHAVAN
SURAT

Manuscripts Library.

S.D.P.B

No. 893

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 893 Subject : Puranic lit.

Title : Bhāgavata 6th Adh.

Author : -

Scribe : -

Date of the work : -

Date of the Ms. : V.S. १५६२

Place of the work : -

Place of the Ms. : -

Size : 11.5" by 5"

Extent : 159 foll.

Language : Sanskrit.

Script : Devanagari

Remarks : —

ॐ॥ ॐनमःपरमात्मने श्रीपुराणपुरुषोत्तमाय॥ अल्पाक्षरायेन्द्रसिंहैकनाम सिंम
हो विराजते यन्नादश्रुतः पलायंते महाकल्मषकुंजराः॥१ विसर्गे संस्थितान् जीवान्वि
मर्यादासु संस्थितान् विष्णुः पाति विलैः रूपैरित्येवं पंचमे स्थितं॥२ अथ षष्ठेकोनविंश
त्या षष्ठे पोषणमुच्यते॥ अतिलंघितमर्यादजनरक्षणलक्षणं॥३ अजामिलस्य नक
वं विष्णुदूतैर्निरूपितं॥ संकेतनगवन्नामपुत्रस्नेहात्तु खंगजं॥४ अजामिलो मन्तु षटी· १
ष्यो ऽभमहापापो यथावितः॥ विश्वरूपादिवातीवृत्ता या देवेश्ववासवः॥५ इंद्रोपिप्र
गवद्भक्तः सख्येनोपेन्द्रसेवकः॥ तदधीनसुरैश्वर्यशत्रुनिर्जयजीवितः॥६ तत्रादौ त्रि

त्रिरध्यायैरजामिलकथोच्यते॥ विश्वरूपकथाषड्भिरिंद्रादाषोक्त्यये ततः॥७ इंद्र
स्यैव तु दोषोक्तौ वृत्राख्यानं तोताष्टभिः॥ षाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः॥
तत्रादौ प्रथमे विष्णोः स्तुतेः पातकिमोचनं तस्य प्रख्यापनायोक्तं यामैर्धर्मादिलक्षणं॥
८ पूर्वोक्तानुवादपूर्वकं निरंतराक्तनरकपातपरिहारोपायं पृच्छति॥ निवृत्तमार्ग इति
षड्भिः॥ श्रीराजोवाच॥ निवृत्तिमार्गः कथितः आदौ भगवता यथा॥ क्रमयोगोपलब्धे
न ब्रह्मणा यदसंसृतिः॥१ आदौ द्वितीयस्कंधे वैश्वानरं याति इत्यादिना॥ भगवता वयाय
थावत् यत्तयेन मार्गेण योगः॥ अर्चिरादिप्राप्तिलेनोपलक्षितो ब्रह्मात्तेन सह अमृतत्वनिर्मो॥

ह्मोऽनवतीति। ब्रह्मणा सद्गतं सर्वेषं प्राप्तेष्वति संचरे। परस्यां तत्त्वतात्मानः प्रविशंतिप
रं पदमिति वचनात्॥३॥ इत्थं त्रिलक्षणश्चैवं वै गुणप्रविषयो भुने। योऽसावलीनप्रवृत्ते गुण
सर्गः पुनः पुनः॥२॥ इति ते वर्णिता द्वितीयस्कंधे त्रैगुण्यं पश्वाद्यादिसुखं तद्दव विषयप्राप्यं यस्य।
न लीनाप्रवृत्तिर्यस्य। तस्य पुंसः पुनः पुनः गुणसर्गः स च कथितः। तृतीये दक्षिणेन पथ
र्यज्ञः पितृलोकं व्रजतीत्यादिना॥ अनुवर्णिता निरंतराध्याये व्याख्यातः। चतुर्थे मन्वंत षटी·
रश्च व्याख्यात आद्यः स्वायंभुवोऽयतः। पंचमे सप्तद्वीपादीनगागतो लक्षणतो मानतो ध २
रामंडलस्य संस्थानं। ज्योतिषां विवराणां च संस्थानं वित्तुर्यथाऽसृजत्। तथा व्याख्यातं। त

देवात्॥४॥ अधर्मलक्षणा नानानरकाश्चानुवर्णिता। मन्वंतरश्च व्याख्यात आद्यः स्वा
यंभुवो यतः॥२॥ प्रियव्रतोत्तानपदोर्वंशास्तच्चरितानि चैवं द्वीपवर्षसमुद्राद्रिनद्यानवत्।
स्पतीन्॥ धधरामंडलसंस्थानं नागलक्षणमानतः। ज्योतिषां विवराणां च यथेदमसृजद्वि
भुः॥ पंचमेऽनेह महाभाग यथैव नरकान्नरः। नानोग्रया तनान्नेयात्तत्तन्मे व्याख्यातुम
र्हसि॥ इनानाउग्रायातनायेभ्यः। तान्नरकान्यथा येनोपायेन न तद्यात् न गच्छेत्त
था मध्धुना व्याख्यातुमर्हसि॥ तत्र तावदसुमहाशुक्रप्रायश्चित्तं विना नरकाद्निवाराद्
त्याद्वा न चेदिति द्वात्स्यां॥६॥ न चेदिहैवापचितिं यथांहसः। कृतस्य कुर्यान्मनउक्तिपाः।

श्रीगुरु ३०॥१

णिनिः।ध्रुवंसमवैषेत्यनरकानुपैतियेकीर्त्तितामेभवतस्तिग्मयातनाः॥७॥मनउक्तिपा।
णिनिः।मनोवाक्कायैः।कृतस्यांहसः।तैरेवइहैवापचितिंप्रायश्चित्तंनकुर्याच्चेत्।तर्हि
गुरुदोषः।प्रेत्यध्रुवंनरकान्ध्रुवमुपैति।मेमयायेभवतःपरिकीर्त्तिताः।तिग्मादारुणायात
तनायेषुतान्॥यस्मादेवं॥८॥तस्मात्पुरैवाश्विहपापनिःकृतौयतेतमृत्योरविपद्यता।
त्मना।दोषस्यदृष्ट्वागुरुलाघवंयथाभिषक्चिकित्सेतरुजांनिदानवित्॥९॥तस्मात्पाप
प्रायश्चित्तेनोयतेत।कदामृत्योःपुरैव।तथाअविपद्यता।म्रियमाणनदेहेन।यद्वा।अविप
द्विपत्तिरहितोयावत्।यतात्मना।संयतेनमनसा।तत्रापिआशु।अन्यथाअतीतवि

षटी· ३

रकालेचिकित्सणंव्यर्थमर्हतीतिवैगुण्यापत्तेः।अत्रनोदयति।दृष्टेतिद्वाभ्यां॥११॥राजोवाच॥
दृष्टश्रुताभ्यांयत्पापंजानन्नप्यात्मनोहितं।करोतिभूयोविवशःप्रायश्चित्तमथोकथं।दृ
ष्टंराजदंडादिश्रुतंनरकपातादिताभ्यांज्ञात्वतःपापमहितंजानन्नपिप्रायश्चित्तादनंत
रं।अथोअतःकारणात्पादृशाद्दिप्रायश्चित्तंतत्रमूलदोषस्यानिवृत्तिः।निवृत्तौ
वापुनश्चपापप्ररोहाद्यायोगादितिभावः॥१३॥क्वचिन्निवर्त्ततेऽभद्रात्क्वचिच्चरतितत्पुनः।
प्रायश्चित्तमथोपार्थंमन्येकुंजरशौचवत्।१०क्वचित्कदाचित्अभद्रात्पापान्निवर्त्तते
।क्वचिन्नदेवपुनराचरति।यथाकुंजरःस्नातोपिपुनःरजोभिरात्मानंमलिनीकरोति।तथा

पापस्य तु निवारणत्वेन नरकपातस्यावरूपत्वा विद्वत्प्रायश्चित्तं व्यर्थमिति परिहरति
॥ श्रीशुक उवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते । अविद्वदधिकारित्वात्प्रा
यश्चित्तं विमर्शनं ॥ ११ ॥ कर्मणः कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाशः आत्यं
तिकः समूलो न इष्यते । अविद्वानधिकारी यस्मिन् । तस्य भावस्तत्त्वं तस्मात् । अतो ऽविद्या
नाशाभावात् नष्टेपि तस्मिन्पापे तत्संस्कारेण पापं तस्य पुनः पुनः प्ररोहो भवत्येव । किं
तर्हि मुख्यं प्रायश्चित्तं । तदाह । प्रायश्चित्तं तु विमर्शनं । ज्ञानं । तत्तु नित्यमप्रमत्तस्य नः शनैः शनै
र्लभते । नान्यः । सदृष्टांतमाह । नेति ॥ १२ ॥ नाश्नतः पथ्यमेवान्नं व्याधयोभिभवंति हि । एवं नि षटी· ५

यमस्ततो राजन्शनैः क्षेमाय कल्पते ॥ १२ ॥ पथ्यमेवान्नमश्नतः पुंसः यथा व्याधयो न बा
धंते तथा यमनियमादिकर्त्ता क्षेमाय तत्त्वज्ञानाय योग्यो भवति शनैः शनैः । तदेव निय
मादि विशदयति । तपसेति द्वाभ्यां ॥ १३ ॥ तपसा ब्रह्मचर्येण शमेन च दमेन च त्यागेन स
त्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥ तपसा एकाग्रेण मनसा । मनसश्चेंद्रियाणां च ऐकाग्र्यं
परमं तप इति स्मृतेः । ब्रह्मचर्येणाष्टांगेन । तदुक्तं स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं
। संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विप
रीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति । शमेन । शमो मनसो नियमनं दमो बाह्येंद्रिया

णां नियमनं ॥ त्यागो दानं ॥ सत्यशौचाभ्यां ॥ यमोऽहिंसादि ॥ नियमो जपादि ॥१३॥ देहवाङ्
बुद्धिजं धीराः धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥१४॥ धीराः वि
वेकिनः महदप्यघं क्षपंति नाशयंति ॥ अस्मादपि दुःकरत्वात् सुखमेवात्यल्पायासं प्रायश्चित्त
माह ॥ केचिदिति ॥१५॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहार
मिव भास्करः ॥१५॥ केचिदित्यनेन नैवंभूता भक्तिप्रधाना भागवता विरला इति दर्शयति ॥ केवल
या तपआदिनिरपेक्षया ॥ वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् ॥ किंत्वेषा
सश्रद्धया तत्र प्रवृत्तेः ॥ अर्थान्नेषैव पर्यवसानात् अनुवादमात्र ॥ एतद्भक्तियोगं ज्ञानमार्गाद षटी ५

प्यतिश्रेष्ठमित्याह ॥ न तथेति ॥१६॥ न तथा ह्यघवान्राजन्पूयेत तपआदिभिः ॥ यथाकृ
ष्णार्पितप्राणस्तत्पुरुषनिषेवया ॥१६॥ न तथा तपआदिना शुध्यति ॥ यथा तत्पुरुषनिषेव
या ॥ कृष्णेऽर्पिताः प्राणा येन ॥ तत्र हेतुः ॥१७॥ सध्रीचीनो ह्ययं पंथाः सर्वक्षेमोऽकुतोभयः ॥
सुशीलाः साधवो यत्र नारायणपरायणाः ॥१७॥ सध्रीचीनः समीचीनः ॥ अयं पंथा भक्ति
मार्गः ॥ यतः क्षेमः ॥ क्षेमत्वे हेतुः ॥ न कुतश्चित् विघ्नादेर्भयं यस्मात् ॥ तदेवाह ॥ सुशीलाः कृपा
लवः ॥ साधवो निष्कामाः ॥ अत एव धर्मिष्ठाः ॥ अतो ज्ञानमार्ग इव सहायता निमित्तं भयं
॥ नापि कर्ममार्गवत् मत्सरादिकृतं भयमिति भावः ॥ भक्तेरन्यनिरपेक्षत्वमुक्तं ॥ स्वा

छ्रादीनि च न किंचिद्विनानशोधयंतीत्याह। प्रायश्चित्तानीति॥ ॥ प्रायश्चित्तानि चीर्णानि
नारायणपराङ्मुखं। न निःपुनंति राजेंद्र सुराकुंभमिवापगाः॥१८॥ महतामपि चेच्छोध
कत्वे दृष्टांतं। सुराकुंभं सहस्रापगा इवेति। न किंचित्स्वल्पापि छुनात्पवेत्याह। सकृदिति॥ ॥ सकृ
न्मनः कृष्णपदारविंदयोः निवेशितं तद्गुणरागि यैरिह। न ते यमं पाशभृतश्च तद्भटान्स्व
प्नेपि पश्यंति हि चीर्णनिःकृताः॥१९॥ तस्य श्रीकृष्णस्य गुणेषु रागमात्रमस्ति तद्गुणात
यस्य। तन्मनः तावतैव चीर्णनिःकृतं प्रायश्चित्तं यैः। इममर्थमितिहासेनोपपादयति। अत्रे
ति॥ ॥ अत्रैवोदाहरंतीममितिहासं पुराविदः। दूतानां विष्णुयमयोः संवादं तं निबोध मे॥

ष.टी.
६

२०॥ मन्त्रः विष्णुदूतयमदूतानां संवादं निबोध शृणु॥ ॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिर
जामिलः। नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः॥२१॥ कान्यकुब्जे पुरे। दास्याः पतिः। द्विज
ब्राह्मणः नाम्ना अजामिलः॥ ॥ बंद्यक्षैः कैतवैश्चौर्यैः गर्हितां वृत्तिमाश्रितः। बिभ्रत्कुटुंबम
शुचिर्यातयामास देहिनः॥२२॥ बंदीग्रहणं। अक्षैश्च द्यूतेन। कैतवैर्वंचनादिभिः। वृत्तिं
जीविकां बिभ्रन्दास्याः कुटुंबं कुत्सितप्राणिनः यातयामास पीडयामास॥ ॥ एवं निवस
तस्तस्य लालयानस्य तत्सु[illegible]। कालोत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः॥२३॥ आयुषः
संबंधी महान्कालोऽत्यगात्। क्रियानिरपेक्षायामाह। अष्टाशीत्या संख्यया युक्ताः समाः।

ता२

संवत्सरा।ठ।।तस्य प्रवयसः पुत्राः दशा तेषां तु योऽवमः। बालो नारायणो नाम्ना पित्रोश्च द-
यितो भृशं।२४ प्रवयसः वृद्धस्य नारायणो नाम दशमः पुत्रः।ठ।। स बद्धहृदयस्तस्मिन्नर्भ-
के कलभाषिणि। निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं।२५ बद्धं हृदयं येन स जरठो
वृद्धः।ठ।। भुंजानः प्रपिबन्खादन्बालकं स्नेहयंत्रितः। भोजयन्पाययन्मूढो न वेदागतम-
ंतकं।२६ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते। मतिं चकार तनये बाले नारायणाह्वये। षटी.
२७ एतच्च तदुपलालनादिना नारायणनामोपचारं माहात्म्यं न तदुक्तिरेवास्त्वदिति सिद्धं। नोप- ३
योगेनापि ज्ञातव्यं।ठ।। स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषान्भृशदारुणान्। वक्रतुंडानूर्ध्वरो-

म्णः आत्मानं नेतुमागतान्।२८ वक्राणि तुंडानि मुखानि येषां ऊर्ध्वानि रोमाणि येषां ता-
न्।ठ।। दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयं। प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः।
२९ प्लावितेन प्लुतत्वं नीतेन स्वरेण। आकुलेंद्रियः भीतः।ठ।। निशम्य म्रियमाणस्य मुख-
तो हरिकीर्तनं। भर्तुर्नाम महाराज पार्षदाः सहसापतन्।३० भर्तुर्हरेः नामकीर्तनं नि-
शम्य सहसा हरेः पार्षदाः आपतन् आययुः। यतस्तद्भर्तुर्नाम पुरःसराः हृष्टाः। भर्तुर्ना-
मग्रहणस्याग्रे येषां।ठ।। विकर्षतोंऽतर्हृदयाद्दासीपतिमजामिलं। यमप्रेष्यान्विष्णुदूता-
वारयामासुरोजसा।३१ ओजसाक्षेपेन।ठ।। ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः। के यू-

यं प्रतिषेद्धारो धर्मराजस्य शासनं।३२ कस्य वा कुत आयाता कस्मादस्मान्निषेधथ। किं दे।
वा उपदेवा वा यूयं किं सिद्धसत्तमाः।३३ वयं युष्माननुजानीमह इति कापोतकार्यः। यतोऽ
लौकिका अद्भुतरूपा यूयमित्याहुः। सर्वे इति सार्धद्वाभ्यां।ब। सर्वे पद्मपलाशाक्षाः पीत।
कौशेयवाससः। किरीटिनः कुंडलिनो लसत्पुष्करमालिनः।३४ लसंत्यः कमनीयाः पुष्क
रमाला कमलमाला संति येषां।ब। सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः। धनुर्निषंगा
सिगदाशंखचक्रांबुजश्रियः।३५ नूत्नं नवं वयो येषां निषंगः इषुधिः धनुर्निषंगादिभिः
श्रीः शोभा येषां ते।ब। दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा। किमर्थं धर्मपाल। ष.टी. ८

स्य किंकरान्नो निषेधथ।३६ दिशो वितिमिरं आलोकश्चान्यस्य प्रकाशो याभ्यस्तथा
भूता दिशः कुर्वंतः। भवतामेतदद्भुतमित्याहुः। किमर्थमिति।ब। श्रीशुक उवाच। इ
त्युक्ते यमदूतैस्ते वासुदेवस्य कारिणः। तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा।३७
अहो दंड्या अदंड्या दिशा नाभन्ना एते चौरा एव अस्म जिया वयं धर्मराजस्य किंकरा इत
युक्तं वदंतीति विस्मयेन प्रहस्य। वासुदेवस्य कारिणः पार्षदाः तान् यमकिंकरान् प्रत्यूचु
ः मेघस्येव निर्ह्रादो ध्वनिर्यस्यास्तया गिरा।ब। विष्णुदूता ऊचुः। यूयं वै धर्मराजस्य य
दि निर्देशकारिणः। ब्रूत धर्मस्य तत्त्वं वं यच्च धर्मस्य लक्षणं।३८ धर्मस्य स्वरूपं लक्ष।

णएवंभूता।ब।कथंस्वित्ध्रियतेदंडः।किंवास्यस्थानमीप्सितं।दंड्याः।किंकारिणः।सर्वेआहो
स्वित्कतिचिन्नृणां।३९।कथंस्वित्केनप्रकारेण।स्थानंविषयः।कारिणःकर्मिणः।नराःप
श्वादयोवा।तेष्वपिकतिचिदेवेत्यर्थः।ब।यमदूताऊचुः।।वेदप्रणिहितोधर्मःअधर्म
स्तद्विपर्ययः।वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम।४०।वेदेनप्रणिहितोविहितो
धर्मः।वेदप्रमाणकइत्यर्थः।अनेनयोवेदप्रमाणकःसधर्मः।योधर्मःसवेदप्रमाणकइति षटी.
स्वरूपंप्रमाणंचोक्तं।अदृष्टमपिअधर्मस्यस्वरूपंलक्षणंचदंडस्थानकथनायाह।अध ९
र्मस्तद्विपर्ययः।योवेदनिषिद्धःसोऽधर्मः।निषेधश्चतस्मिन्प्रमाणमित्यर्थः।वेदस्यप्रामाण्ये

हेतुः।वेदोनारायणादुद्भूतः।सच्चसाक्षादित्युपचारः।स्वयंभूरितिच।निःश्वासमात्रे
णस्वयमेवभवतीति।तथाचश्रुतिः।अस्यमहतोभूतस्यनिःश्वसितमेतदृग्वेदइति।
कोसौनारायणस्तत्राह।ब।येनस्वधाम्न्यमीभावारजःसत्वतमोमयाः।गुणनामक्रि
यारूपैर्विभाव्यंतेयथातथं।४१।येनस्वधाम्निस्वस्वरूपेऽमीभावाःप्राणिनः।गुणाःशांत
त्वादयः।नामानिब्राह्मणक्षत्रियादीनि।क्रियाःअध्ययनाद्याः।रूपाणिवर्णाश्रमादीनि
तैर्विभाव्यंतेविविच्यंते।यथायथं।यथार्थंनारायणः।तथाप्यधर्मोनेनकृतइति।कु
तोज्ञायतेतत्राह।ब।सूर्योग्निःकंमरुद्गावःसोमःसंध्याहनीदिशः।कालत्रयंधर्मइति

एते देहस्य साक्षिणः ॥४२॥ अदृनी । अह । अश्वरात्रि कं उदकं । गौ पृथ्वी देहस्य जीवस्य साक्षि
णः ॥४॥ एतैरधर्मो विज्ञातः सुष्ठु दंडं अस्य सुज्यते । सर्वैक्रमानुरोधेन दंड मर्हतीति कारिणः ॥४
३ एतैर्निमित्तभूतैरधर्मो विज्ञातः । दंड्यानाङ्क्षः सर्व इति । कारिणः कर्मिणः ॥४॥ संभवंती
दृष्टजाणि विपरीतानि चानघाः । कारिणां गुणसंगोस्ति देहवान्न ह्यकर्मकृत् ॥४४ विपरी
तानि अधर्माण्यपि कर्मिणां संभवंति । यतस्तेषां गुणसंगोऽस्ति । यदि कश्चिदकर्त्ता स्यात्त
र्हि तस्मान्न जायन्ते । तच्चेतदस्तीत्याह । न हि देहवान् अकर्मकृदस्तीति । अतः सर्वे क
र्मिणां च पापस्यावश्यंभावित्वात्ततः सर्वे दंडमर्हतीत्यर्थः । कथं स्थितं ब्रियते दंडः इत्यस्यो

षष्टी
२७

त्तरं । येनेति ॥४॥ येन यावान् यथाऽधर्मो ह्यधर्मो वा समीहितः । स एव तत्फलं भुंक्ते तथा ता
वदमुत्र वै ॥४४॥ धर्मो वेति दृष्टांतः । अधर्मानुसारेण दंडः धर्मानुसारेण सुखवदित्यर्थः । न
केवलं सूर्यादय एव ज्ञापकाः । किं च अर्थापत्तिरपीत्याह । यथेति ॥४॥ यथेह द्रव्य ऐश्वर्या त्रै
विध्यमुपलभ्यते । भूतेषु गुणवैषम्यात् तथान्यत्रानुमीयते ॥४५॥ देहेद्रव्यश्वराः इह जन्मनि
ज्ञां तयोरसद्भावेन वा सुखिदुःखिमिश्रत्वेन वा धार्मिकत्वादिना त्रैविध्यं । भूतेषु यथोपल
भ्यंते । तथान्यत्र जन्मांतरेपि अनुमीयते । त्रैविध्यान्यथानुपपत्त्या कल्प्यते । वर्त्तमानज
न्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टांतमाह । वर्त्तमान इति ॥४॥ वर्त्तमा

तोन्त्ययोः कालो गुणाभिज्ञापको यथा। एवं जन्मान्त्ययोरेतत् धर्माधर्मनिदर्शनं॥४६
वर्त्तमानो वसंतादिकालः अन्त्ययोर्भूतभविष्ययोर्वसंतीयागुणाः पुष्पफलादयः तेषा
मभिज्ञापको यथा। एवमेतद्वर्त्तमानं जन्म अन्त्ययोर्भूतभविष्ययोर्जन्मनोः धर्माधर्मौ नि
दर्शयतीति तथा। अयं च धर्माधर्मज्ञानप्रकारोऽन्येषां। धर्मराजस्तु मनसैव सर्वं पश्यती
त्याह॥छ॥ मनसैव पुरे देवः पूर्वरूपाणि पश्यति। अनुमीमांसते पूर्वं मनसा भगवानज
॥४७॥ पुरेऽस्मिन्यमिन्यां स्थित एव देवो यमः जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्य
ति। अनु अनंतरं अपूर्वरूपं मीमांसते। यदस्यानुरूपं योग्यं तद्विचारयति। यातनास्वेन ग

षटी
२१

वान्। तीरेण तु पश्चात्पितं वर्त्तमानं देहं पश्यति॥छ॥ यथाज्ञस्तमसा युक्त उपास्ते व्यक्त
मुपास्ते व्यक्तमेव हि। न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा॥४८॥ अज्ञस्त्वविद्योपाधिर्जीव
व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्त्तमानं देहं तु पास्ते। अहमिति मन्यते। पूर्वमपरं तु न
वेद। अत्र हेतुः। नष्टा जन्मना स्मृतिर्यस्य। अत्र दृष्टांतः। तमसा निद्रया युक्तो यथास्व
प्नेऽभिव्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादि पूर्वं स्वप्नादिगतं वा। तद्वदित्यर्थः। एवं तत्
स्य जीवस्य संसारं प्रपंचयति पंचभिः॥छ॥ पंचभिः कुरुते स्वार्थान् पंच वेदाथ पंचभिः। ए
कस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते॥४९॥ पंचभिः कर्मेंद्रियपादपाण्यादिभिः प

दस्वार्थान्वचनादानादीन्। पंच बुद्धींद्रियैः शब्दादीन् विषयान् वेद। षोडशेन मनसा
सह सप्तदशः। षोडशोपाध्यंतर्गतो विश्वयमेव सर्वेंद्रियविषयप्रतिसंधानात्तत्र ज्ञानें-
द्रियकर्मेंद्रियमनो विषयाननुप्राप्नोति। ब। तदेवं षोडशकलं लिंगं शक्तित्रयं महत्। धत्ते-
नुसंसृतिं पुंसि हर्षशोकभयार्तिदां। ५०। तदेतल्लिंगशरीरं शक्तित्रयं गुणत्रयकार्यं महद-
दादि। पुंसि जीवे अनुसंसृतिं धत्ते। ब। देहज्ञोऽजितषड्वर्गो नैच्छन् कर्माणि कार्यते षटी। १२
। कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति। ५१। नैच्छन् अनिच्छन्नपि अनेनैव कर्माणि का-
र्यते। कोशकारः कीटविशेषः। मुह्यति निर्गमोपायं न जानाति। कर्माणि कार्यते इत्यत्र

तुमेवं प्रमाणयति। न हीति। ब। न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः
कर्म सर्वः प्रकृतिजैर्गुणैः। ५२। गुणैः गुणकार्यरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्का-
रोद्भूतैः कर्मवशेन च तदनुरूपो देहो भवतीत्याह। लब्ध्वेति। ब। लब्ध्वा निमित्तमव्यक्तं व्य-
क्ताव्यक्तं भवत्युत। यथायोनि यथाबीजं स्वभावेन बलीयसा। ५३। अव्यक्तं अदृष्टं निमित्तं
लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च शरीरं भवति। यथायोनि मातृसदृशं यथाबीजं पि-
तृसदृशं। स्वभावो वासना। शुक्रशोणितयोरेकत्वेपि कर्मवासनया पितृमातृसदृशो दे-
हो भवतीत्यर्थः। संसारक्रममुपसंहरंस्तो मुक्तिप्रकारमाह। एष इति। ब। एवप्रज्ञाति स

गेन तु रूपस्य विपर्ययः ॥ आसीत्स एव न चिरात् ईशसंगाद्विलीयते ॥५४॥ ईशसंगात् स्त्रीवा
सुदेवभजनात् देवं मामान्यतो धर्मादितिर्ल्लभ्य चक्राक्षस्तु तस्याज्ञापिलस्याच्च धर्मश्रपवर्ध्येत
दं अवमाकुः ॥ अयं हीति ॥ ॥ अयं वस्तुतपं पत्रः शीलदत्तस्त्रगुणालयः ॥ दृत व्रताद्दृ दोत
सत्यकामगनुसूयकः ॥५५॥ तत्र वास्यान्त स्वर्वदत्तानुवादो न्यायतिरेक प्रदर्शनार्थः ॥ दृत्तंस
दाचारः ॥ गुणाः क्षमादयः ॥ धृत व्रतः धृतं विष्णो राधनलक्षणं व्रतं यस्य ॥ ॥ गुर्वग्न्यतिथि
वृद्धानां शुश्रूषुरनहंकृतः ॥ सर्वभूतसुहृत्साधु मितवाक् मंत्रविच्छुचिः ॥५६॥ तथापि निरहंकृ
तो हंकाररहितः ॥ ॥ एकदासौ वनं यात पितृसंदेशकृद्विजः ॥ आदाय ततआवृत्तः फल घटी· १३
मूलसमित्कुशान् ॥५७॥ आवृत्तः फलादीन्यादायवनी न्निवृत्तः ॥ ॥ ददर्शकामिनं कंचित
शूद्रं सह भुजिष्यया । पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥५८॥ भुजिष्यया भोगस्त्रियावे
श्यया सह । मैरेयं मद्य । पेष्टीं सुरां पीत्वा मदेनाघूर्णिते चंचले नेत्रे यस्याः सा । तया ॥ ॥ मत्तया
विश्लथन्नीव्यापेतं निरपत्रपं ॥ क्ष्वेलंतमनुगायंतं हसंतमनयांतिके ॥५९॥ विशेषेण श्लथं
ती नीवी यस्याः तया सहव्यपेतं स्वाचारात् च्युतं ॥ ॥ दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभि
तां ॥ अगामहृच्छयवशं सहसैव विमोहितः ॥६०॥ कामलिप्तेन कामोद्दीपकेन तदंगरागेन हृ
रिद्रादिना लिप्तेन ॥ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्वं यथाश्रुतं न शशाक समाधातुं मे

नोमदनवेपितं ।६१। स्तंभं धैर्यं श्रुतं ज्ञानं तत्बलेन सत्त्वं भयतन्नपि मदनेन कामेन कंपितं मनः
समाधातुं न शक्तोऽहं तु ।६२।। तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः । तामेव मनसा ध्यायन्
स्वधर्माद्विरराम ह ।६३। तद्दर्शनमेव निमित्तं यस्य । स्मरव्याजस्य ग्रहस्य तेन ग्रस्तः । विचेतनो
गतस्मृतिः ।६४।। तामेव तोषयामास पित्र्येणार्थेन यावता ।। ग्राम्यैर्मनोरमैः कामैः प्रसीदेत
यथा यथा ।६५। यावता समग्रेण धनेन ।६६।। विप्रां स्वभार्यामप्रौढां कुले महति लंभितां ।। वि
ससर्जाचिरात्पापः । स्वैरिण्यापांगविद्धधीः ।६७। लंभितां परिणीतां ।६८।। यतस्ततश्चोपनिन्ये षटी १४
न्यायतोऽन्यायतो धनं । बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ।६९। यदसौ शास्त्रमुल्लंघ्य

स्वैरचार्यतिगर्हितः ।। अवर्तत चिरं कालमघायुरशुचिर्मलः ।६६। अघ एव रूपमायुर्यस्य । म
लमेव तदीयमन्नादिकमश्नातीति ।। तत एनं दंडपाणेः सकाशं कृतकिल्बिषं । नेष्यामो
ऽकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ।६७। अकृतनिर्वेशं अकृतप्रायश्चित्तं । अस्यैव हितार्थे
नेष्याम इत्याह । यत्रेति ।६८।। ।।इति श्री भागवते महापुराणे षष्ठस्कंधेऽजामिलो ले
पाख्याने प्रथमोऽध्यायः ।। ।।१।। ।।द्वितीये वैष्णवैर्याम्यान्नानामाहात्म्यमद्भुतं ॥
श्रावयित्वा द्विजो विष्णुलोकं नीतस्तु कीर्त्यते ।।१।। श्री शुक उवाच ।। एवं ते भगवद्दूता य
मदूताभिभाषितं । उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः ।। नयकोविदाः ।।१

न्यायशास्त्रपारंगताः। तान्धर्मराजकिंकरानुपधार्य ज्ञात्वा प्रत्याहुः। प्रत्युत्तरमूचुः॥ ॥
विष्णुदूता ऊचुः॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां। यत्रादंड्येष्वपापेषु दंडो यैर्ध्रि-
यते वृथा ॥२॥ धर्मदृशां सतां अधर्मः स्पृशतीति अहो कष्टं। तदाह। यत्र यैर्धर्मदृग्भिः॥ ॥ प्र-
जानां पितरो ये च शास्तारः साधवः समाः। यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः॥३॥ पि-
तरः पितृवत्पालकाः। शास्तारः अनुशिष्यकाः। वैषम्यं अदंड्यदंडनं। अहो एभिः प्रव-
र्तितमधर्ममन्योपि करिष्यतीति महत्कष्टमनूद्दिश्याह॥ ॥ यद्यदाचरति श्रेयानितरस्त-
त्तदीहते। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ ॥ श्रेयान श्रेष्ठः॥ ॥ यस्यांके शिर आधा-

षटी·
१५

धाय लोकः स्वपिति निर्वृतः। स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः॥५॥ निर्वृतः निश्चिंतः
। विश्वासघातकाद्यूयमित्यर्थः॥ ॥ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं। विस्रंभणी-
यो भूतानां सघृणो दोग्धुमर्हति॥६॥ विश्वासेन नितरामर्पित आत्मा येन तं। विस्रंभ-
णीयः विश्वसनीयः। सघृणः सदयः। ननु अस्य पापिनो दंडे किमर्थमाक्रोशः क्रियते तत्रा-
ह। अयमिति॥ ॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि। यद्व्याजहार विवशो नाम-
स्वस्त्ययनं हरेः॥७॥ यद्यस्मात् विवशोपि हरेर्नाम व्याजहार। उच्चरितवान्। न केवलं प्रायश्चि-
त्तमात्रं हरेर्नाम। किं तु स्वस्त्ययनं मोक्षसाधनमपि। ननु कर्मसाकुण्यं हरेर्नामेति युक्तं

यस्य स्मृत्येति वचनात्। स्वातंत्र्येणाघनिवर्तकं हरेर्नाम कथं स्यात्। वज्राङ्गः॥ एतेनै
वेति॥ एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतं। यदा नारायणायेति जगाद चतुरक्षरं
॥८॥ अघोनः अघवतः। मघवच्छब्दवद्रूपं। यत्त्वाहेति चेदः। आदीपत्त्वान्नासमाप्तेव।
चतुरक्षरं नाम जगाद। एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं प्रदर्शितं। नारायणेत्याग
ह्रित्येवं विक्रोशरूपेणोच्चारणकालेन। अत्रायं भावः। कर्माङ्गत्वेपि हरिनाम्नः स्वादिरां षटी·
गवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थमुक्तमेव। तथा हि। हरिर्हरति पापानि दुष्टचि १६
त्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥ अवशेनापि यन्नाम्नि कीर्तिते स

र्वपातकैः पुमान्। विमुच्यते भयात्सिंहैस्त्रस्तैर्मृगैरिवेत्यादि पुराणवचनात्। तावस्य
स्वशेनाम्नः स्वातंत्र्यमवगम्यते। विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवा
दस्तद्धानादर्थवादस्त्रिधा मतः। न चैतेऽर्थवादा इति शंकनीयं। विधिशेषत्वाभावा
त्। न च विध्यश्रवणादन्यशेषता कल्पनीया। यदाग्नेयोऽष्टाकपालो भवतीत्यादिवद्वा
त्मार्थत्वेन विधिकल्पनोपपत्तेः। मंत्रेषु च॥ मर्त्या अमर्त्यस्य ते भूरि नाम मनामहे। विप्रासो जा
तवेदसः। अमृतानन्दरूपो द्वादशभिः सर्वधर्माधिक्यमधिगम्यते। उपपादितं च मंत्रार्थवा
दानामपि स्वार्थे प्रामाण्यं देवताधिकरणे। तस्मात् श्रीनारायणनामाभासमात्रेणैव म

वाघनिःकृतंस्यात्।तस्यादिति।ननुकामकृतानांबहूनांमहापातकानांप्रत्यहंचावर्त्ति-
तानां द्वादशाब्दादिकोटिशिरःपर्यन्तिवर्त्यानां कथमेकमेव हरेर्नाम प्रायश्चित्तं स्यात्।तत्र
ऽऽहः।स्तेन इति द्वाभ्यां।८।स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः।स्त्रीराजपितृगोहं-
तायेच पातकिनोपरे।९।सर्वेषामप्यघवतामिदमेव सुनिःकृतं।नामव्याहरणं विष्णोर्य-
तस्तद्विषया मतिः।१०।सुनिःकृतं श्रेष्ठंप्रायश्चित्तं।इदमेव।तत्र हेतुः।यतो नामव्याहरणात्
तद्विषया नामोच्चारकपुरुषविषया विष्णोरिति मतिर्भवति इतीति किं।यत् मदीयोयं मया
सर्वतो रक्षणीयः।हरेर्नाम्नः श्रेष्ठत्वमुपपादयति।नेति द्वाभ्यां।८।न निःकृतैरुदितैर्ब्रह्म- षटी. १७

वादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः।यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोक
गुणोपलंभकः।११।ब्रह्मवादिभिर्मन्वादिभिः उक्तैर्व्रतादिभिः निःकृतैस्तथा न शुध्यति।उदा-
हृतैरुच्चरितैर्यथा नामपदैरित्यनेन नमामीत्यादिक्रियायोगोपि नापेक्षितः।इति दर्शि-
तं।किंच।तन्नामपदोच्चारणं उत्तमश्लोकगुणानां चोपलंभकं ज्ञापकं भवति।ननु कृच्छ्रचां-
द्रायणादिवत्पापनिर्हृतिमात्रेणोपक्षीणमित्यर्थः।८।नैकांतिकं तद्धिकृतेपि निःकृ-
ते।मनः पुनर्धावति चेदसत्पथे।अतः कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभा-
वनः।१२।नैकांतिकं नात्यंतं शोधकं तन्निःकृतं।यस्मिन्कृतेपि पुनरसत्पथे पापमार्गे मनो

धावति। विकर्मणां पापानां निर्हारी स्यात्स्वतिकं नाश मिह्ठतां दृष्टेण तुवादस्यवप्रायश्चित्तं
।यतो मोक्षतुमवचावनः। चित्तशोधकः॥८॥ अथैनं पापनयतत्कृताशेषाघनिःसृतं य
दसौ भगवन्नाम म्रियमाणः समगृहीत॥१२॥ अथ तस्मादेनं अपमार्गे पापमार्गे मानयत।
हृतमशेषाणां मघानां निष्कृतं येन। यत यस्मात् समगृहीत्। सांकेत्यपुत्रपरिवारान्। नाम
मेकदेशेनाप्युलमितिभावः। म्रियमाणः इत्यनेन भूतः पापांतरासंभव उक्तः। ननु तदा षष्टी
नीरुक्ष्यादि विधिवत् नामोच्चारणविधेरप्यसंभवात्। न च विधिं विना काकतालीवत् ना १८
मोच्चारणं पापहरमेव प्रमाणमस्ति। न त्वयं भूत्वा नामागृहीत् न तु भगवन्नाम तत्राह। सांके

त्यमिति॥८॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा। वैकुंठनामग्रहणमशेषाघहरं
विदुः॥१४॥ सांकेत्यं पुत्रादौ वैकुंठेति। पारिहास्यं परिहासेन गृहीतं। स्तोभं गीतालापपरि
रणार्थं गृहीतं। हेलनं किं विष्णुनेति सावज्ञं इत्यादिनापि वैकुंठनामोच्चारणं अशेषाघ
हरं भवति ननु नाधसंकल्पपूर्वं वैकुंठनामागृहीत्। किं तु भ्रंशेन दूपरवशात् सकृत् तत्राह प
तित इति॥८॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः। हरिरित्यवशेनाह पुमान्नार्ह
ति यातनाः॥१५॥ अवशेनापि यो हरिरित्याह स यातनां नार्हति। पुमानित्यनेनात्र वर्णा
श्रमनियम इत्युक्तं। अवशात्वमेवाह। पतितः प्रासादादिभ्यः। स्खलितो मार्गे। भग्नः भग्नांग

।स्कंदे दृष्टो दृष्टकादिना। तप्तोक्षरादिना। आदत्तो दंडादिना। ननु महतः पापस्य महदेव प्रा
यश्चित्तं युक्तं। न त्वल्पं नामग्रहणमात्रं। पापतारतम्येन तच्छुद्धितारतम्यं। तत्राह। गुरूणा
मिति द्वाभ्यां ॥ ३ ॥ गुरूणां च लघूनां च गुरूणि च लघूनि च। प्रायश्चित्तानि पापानां ज्ञात्वो
क्तानि महर्षिभिः ॥ ३ ॥ गुरूणां पापानां गुरूणि प्रायश्चित्तानि। लघूनां पापानां लघूनि प्रा
यश्चित्तानि। तारतम्यं ज्ञात्वा मन्वादिभिः उक्तानि। अतस्तत्र तथैव व्यवस्था दृश्यतामस्तु नैवं
व्यवस्थोक्ता। विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात्। न च गुरुलघुपातेम
हापातकं च स्मरणं च तन्नाम्नः तत्प्रायश्चित्तं च स्मरणं। इति भावः ॥ ४ ॥ तेस्ताह्यघातिपूयं। प्रा· १७

ते तपोदानजपादिभिः। नाधर्मजं तत्हृदयं तदपीशांघ्रिसेवया ॥ ५ ॥ तैस्तपोदानादिभिः
प्रायश्चित्तैः तान्यघानि वहत्यंते। न श्यंति। अधर्मजातं मलिनं च तस्य पापकर्तुर्हृदयं। यद्य
तेषामघानां हृदयं शुद्धं संस्काराख्यं न शाम्यति। तदपि ईशांघ्रिसेवया कीर्तनादिना श
म्यतीत्यर्थः। अयं भावः। महांत्यपि पापानि सकृदुच्चरितेनैव नाम्ना नश्यंति। सकृत्प्रज्व
लितदीपेनैव गाढध्वांतानि तथापि आवृत्त्या तु पापांतरस्यानुत्पत्तिः। दीपधारणवत्तमोंत
।वतश्च वासनाख्यात्हृदयशुद्धिः। एतदर्थमेव तत्र तत्रावृत्तिविधानं। पापक्षयश्च भव
ति स्मरतां तमहर्निशं इत्यादिश्रवणात् तदेवाग्राप्युक्तं। गुणानुवादः खलु सत्त्वभावनः।

तपीशां किमेव ये तिष्ठ। अतो स्मृहरिनाम्नैव सर्वपापक्षयः। वासनाक्षयस्तु महद्गुरुपद
र्शनादिति। तथा विपापप्रायश्चित्तमिदमिति ज्ञात्वा ज्ञात्वा नोच्चारितमिति चेत्। तत्राह॥८॥ अ
ज्ञानादथवाज्ञानादुत्तमश्लोकनाम यत्। संकीर्तितमघं पुंसो दहेदेधो यथानलः॥१८॥ अ
ज्ञानादिति वा। केनाप्यज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत्। नन्वेवमपि पर्ष
दनुपदिष्टश्रद्धादीनं च कथं प्रायश्चित्तं स्यात्तत्राह। यथेति॥८॥ यथागदं वीर्यतममुपयु ५टी.
क्तं यदृच्छया। अजानतोऽप्यात्मगुणं कुर्यान्मंत्रोऽप्युदाहृतः॥१९॥ अगदामोषधं वीर्यवत्तमम २०
पि यदृच्छया श्रद्धादिहीनं उपयुक्तं पद्धितं पर्षन्मुखादज्ञानतोऽपि स्वगुणमारोग्यादिकं

कुर्यात्। मंत्रो नामात्मकस्तथा स्वकार्यं सकृदयं पापक्षयं कुर्यादेव। न हि वस्तुशक्तिः श्रद्धा
दिकमपेक्षत इत्यर्थः। तदुक्तं विष्णुधर्मे। हरिर्हरति पापानीति॥८॥ श्रीशुक उवाच॥ त एवं
सुविनिर्णीय धर्मं भागवतं नृप। तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन्॥२०॥ अमूमुच
न्मोचयामासुः। आगतं शुल्कमपि तस्मात् मित्यर्थः॥८॥ इति प्रत्युदिता याम्या दूता गत्वा
यमान्तिकं। यमराज्ञे तथा सर्वमाचचक्षुररिंदम॥२१॥ प्रत्युदिता निराकृताः। संतो यमदूता
गत्वा धर्मराजाय यथावृत्तं कथयामासुः॥८॥ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं ग
तः। ववंदे किंकरान्विष्णोः शिरसा दर्शनोत्सवः॥२२॥ विष्णोः पार्षदानां दर्शनेनोत्सवो यस्य

ग्रवंदे ॥२२॥ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः । सहसा पश्यतस्तस्य तत्रांतर्द्दधिरेनघ ॥ २
३ विवक्षुं वक्तुमिच्छुं तं ज्ञात्वा महापुरुषस्य विष्णोः पार्षदा अत्रैव अंतर्द्दधिरे अदर्शनं प्राप बभूवुः ।
२३ ॥ अथाजामिलश्चाकर्ण्य दूतानां यमकृष्णयोर्धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं । २४ त्रै
विद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं । यमदूतानां श्रीकृष्णपार्षदानां सकाशात् भागवतं भगवत्प्र
णीतं । अत एव शुद्धं निर्गुणं धर्ममाकर्ण्य ॥ २४ ॥ भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः षटी· २२
। अनुतापो महानासीत् स्मरतोऽशुभमात्मनः ॥ २५ भक्तिमानासीत् इत्युत्तरस्यानुषंग
ः । अनुतापं प्रपंचयति अहो इति चतुर्भिः ॥ २५ ॥ अहो मे परमं कष्टमभूदविजितात्मनः । येन

विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ येन आत्मना मया वृषल्यां पुत्रतया जायमानेन
ब्रह्म ब्राह्मण्यं विप्लावितं नाशितं ॥ २६ ॥ धिग्मां विगर्हितं सद्भिः धिक्कृतं कुलकज्जलं । हित्वा बा
लां सतीं योऽहं सुरापीमसतीमगतः ॥ २७ दुःकृतं दोषकर्तारं । कुलस्य कज्जलं कलंकं । य
तः हित्वेति ॥ २७ ॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ । अहो धुना मया त्यक्तावकृत
ज्ञेन नीचवत् ॥ २८ नास्त्यन्यो बंधुः उभया द्विर्ययोः । तपस्विनौ संतप्तौ । अधुना तत्क्षणमेव ।
कृत्वेव नीचइव । यथा नीचोऽधमः पितरौ त्यक्त्वा पृथक् तिष्ठति ॥ २८ ॥ सोऽहं व्यक्तं पतिष्यामि
नरके भृशदारुणे । धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः ॥ २९ इदानीं तस्य विमर्शंप्र

र्वकं मोह्लकममाद्द ।। किमिदमित्यपृच्छत् ।।७।। किमिदं स्वप्न आहो स्वित् साक्षाद्दृष्टमिहाद्भुतं
। क याता अद्य ते ये मां विकर्षन् पाशपाणयः ।।३०।। साक्षात्स्वप्नमिदृज्ञाय तैव दृष्टं ये मां विमो
चयन् ते क्व गता इत्याह । अथेति ।।७।। अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः । व्यमोचय
न्नीयमानं बद्धा पाशैरयस्मयैः ।।३१।। अथापि मे दुर्भगस्य विबुधोत्तमदर्शनं । भवितव्यं मंगल
लेन येनात्मा मे प्रसीदति ।।३२।। यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापीयान् । अथापि जन्मांत
रे सुकृतं पुण्यवानस्मीह । विबुधोत्तमदर्शनमिति । तेषां दर्शनार्थं पूर्वेण महता मंगलेन पुण्ये षटी· २२
न भवितव्यं । येन दर्शनेन ।।७।। अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः । वैकुंठनामग्रह

णं जिह्वा मे वक्तुमर्हति ।।३३।। अन्यथा पूर्वपुण्यं विना । कथंभूतं नाम । ग्रहणं । गृह्यते वशीभ्य
यते अनेनेति हरिरिति ग्रहणं ।।७।। क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः । क्व च नारायणे
त्येतद्भगवन्नाममंगलं ।।३४।। ब्रह्मघ्नः विश्वघ्नः नाशकः ।।७।। सोहं तथा यतिष्यामि जितचि
त्तेंद्रियानिलः । यथा न भूय आत्मानमंधे तमसि मज्जये ।।३५।। विमुच्य तमिमं बंधमविद्या
कामकर्मजं । सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ।।३६।। मोचये ग्रस्तमात्मानं योषिन्म
य्यात्ममायया । विक्रीडितो ययाचाहं क्रीडामृग इवाधमः ।।३७।। ममाहमिति देहादौ हित्वामि
थ्यार्थधीर्मतिं । धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ।।३८।। मिथ्याभूतेर्थे धीर्यस्या तथा ।

नूतनस्मन्देहादोषमद्देमोपि निमतिंदिव्यात्मभगवतिश्रीवासुदेवेमनोधारये॥ ॥इतिज्ञात्वातु
निर्वेदःस्वेराष्ट्रंगेनमाधुभा।गंगावारस्तुपयायत्तुकृत्सर्वानुबंधनः।३९मुक्तंसर्वंह्यनुबंधनंतु
त्वादिस्नेहोयेनमतः॥ ॥मतस्मिन्देवमदनस्यासीनोयोगमास्थितः।प्रत्याहृतेंद्रियग्रामो
युयोजमनआत्मनः।४०प्रत्याहृतःइंद्रियग्रामोयेन॥ ॥ततोगुणेभ्यआत्मानंवियोज्या
त्मसमाधिनाछिन्नैकाग्र्येणभगवतोधाम्निस्वरूपे॥ ॥मुमुजेभगवत्याम्निब्रह्मण्यनुभवा
त्मनि।४१गुणेभ्यःदेहेंद्रियादिभ्यःआत्मानंमनःवियोज्यआत्मसमाधिनाविनैकाग्र्येणभग षटी· २२
वतोधाम्निस्वरूपे॥ ॥यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः।उपलभ्योपलब्धान्

प्राक्ववंदेशिरसाद्विजः।४२उपरतानिश्चलाधीर्यस्य।तस्मिन्कालेअद्राक्षीत्पुरःपु
रतः।ततश्चप्रागुपलब्धानेवतानुपलभ्यप्राप्यशिरसायववंदेसाष्टांगंनमश्चकार॥ ॥द्विवा
कलेवरंतीर्थेगंगायांदर्शनादनु।सद्यःस्वरूपंजगृहेभगवत्पार्श्ववर्तिनां।४३साकंविहायसा
विप्रोमहापुरुषकिंकरैः।हैमंविमानमारुह्यययौयत्रश्रियःपतिः।४४उपसंहरति॥
एवमितिविधायां॥ ॥एवंहिविप्लावितसर्वधर्मादास्याःपतिःपतितोगर्ह्यकर्मा।।निपात्यमा
नोनिरयेहतव्रतःसद्योविमुक्तोभगवन्नामगृह्णन्।४५विप्लाविताःसर्वेधर्मायेन।हतंव्रतं
स्वदारनियमादिपित्रोर्भक्तिर्वायेन॥ ॥नातःपरंकर्मनिबंधकृंतनंमुमुक्षतांतीर्थपदानु

कीर्त्तनात् । न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं यथान्यथा ॥४६॥ कर्मनि
बंधनस्य पापमूलस्य लंततं । छेदकंच्चतः परं नास्ति । कस्मात्परं । तीर्थपदस्य विष्णोरनुकीर्त्त
नात् । तत्र हेतुः । यत् यतोऽनुकीर्त्तनात् अन्यथा कीर्त्तनं विना कलिलं मनो यथा सज्जते तथा ॥ ॥
य एतं परमं गुह्यमितिहासमघापहं । शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्त्तयेत् ॥४७॥ न
वै स नरकं याति नेक्षन्ते यमकिंकरैः । यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ॥४८॥ म्रिय
माणो हरेर्नाम गृणन् पुत्रोपचारितं । अजामिलोप्यगाद्धाम किंपुनः श्रद्धया गृणन् ॥४९॥ म्रिय षटी.
माणः स्ववशाद्येन न श्रद्धाविद्वानोपि । किं पुनः श्रद्धया गृणन्निति ॥ ॥ ॥ इति श्रीभाग २५

वते महापुराणे षष्ठस्कंधे अजामिलोपाख्याने द्वितीयोऽध्यायः ॥ ॥ ॥ ॥ तृतीयेतु यमे
ना पि वैष्णवोत्कर्षवर्णनैः । सांत्वयित्वा स्वदूतांस्तान् वैष्णवैः किंकरीकृतान् ॥ विष्णुदूतैरु
क्तं विष्णुवंशास्त्वं यमपुत्वेन दृढयितुं तृतीयाध्यायारंभः ॥ ॥ तत्र यदुक्तं । यमराज्ञो तथास
र्वमानवचक्षुरिति । ततः किं वृत्तमिति पृच्छति ॥ ॥ राजोवाच । निशम्य देवः स्वभटोपवर्णि
तं प्रत्याह किं तानपि धर्मराजः । एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं ॥१
२२ सुरारेर्नैदेशिकैः किंकरैः एवं विहताज्ञा आज्ञा यस्य । यस्य वशवर्त्ती सर्वोयं जनः । सो पितान्
यमदूतान् प्रति किमाह । यमस्येति ॥ ॥ यमस्य देवस्य न दंडभंगः कुतश्चनार्षे श्रुत पूर्व

स्यासीत्।एतन्नु नेत्युक्तं त्रिलोकसंशयं नछिन्दन्त्यः इति मे विनिश्चयः।४।समस्य दंडभंगः।
क्रतश्च तकस्माचिद् पिश्रुतपूर्वो नासीत्।एतत् एतस्मिन्नर्थे।यथान श्रुतपूर्वः एतत्यमद्
त निराकरणं यदासीत्।अतः सर्वस्यापि लोकस्य संशयो वर्त्तते।तं च संशयं वक्तोन्योन
छिनत्तीति मे विनिश्चितं।अतः कथयेति शेषः।८।श्रीशुक उवाच।।भगवत्पुरुषै राज
न्यास्याः प्रतिहतोद्यमाः।पतिं विज्ञापयामासुः यमं संयमिनीपतिं।१।भगवतः पुरुषैः
प्रतिहतः उद्यमो येषां ते याम्याः यमं विज्ञापयामासुः।७।यमदूता ऊचुः।।कति संतीह षष्ठ· २५
शास्तारो जीवलोकस्य वै प्रभो।त्रैविध्यं कुर्वतः कर्मफलाभिव्यक्तिहेतवः।ध कति संतीत्या

क्षेपोक्तिः।त्रैविध्यं त्रिविधं सात्विकादि।तथा कर्मफलस्याभिव्यक्तिहेतवः।कति संतीति
।संबद्धवः को बाधः इति चेत तत्राह यदीति।८।यदि स्युर्बहवो लोके शास्तारो दंडधा
रिणः।कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा।पठत्युर्दुःखं।अमृतं सुखं तेषां विप्रति
पत्तौ तेउ नेकस्य स्यातां न वा कस्य।परस्पर विरोधेनोभयोरपि प्रतिबंधात्।एकमत्या उ
कस्य वा न स्यातां।एकः सुखं प्रापयितुमिच्छति द्वःखं नान्यः।एकमत्यैव तयोः परस्परकार्यछि
मोदनेनाभयोरपि प्राप्तः कस्य वा तेउ नेकस्यापि न स्याता मित्यर्थः।८।।किं तु शास्तृबहुत्वे
स्यात् बहूनामिद कर्मिणां।शास्तृत्वमुपचारो हि यथा मंडलवर्त्तिनां।६ननु बहूनां कर्म।

णां च वस्तु याबद्द्वःशास्त्ररोपं वा तु। तथा सति नायं दोषः स्यान्नत्वाद्यावक्तृतां कर्म्मणां व्यव
स्थायां शास्त्रवक्तृत्वे शास्त्रत्वं स्याद्घटेत। किंतु यदा यस्य सर्व्वशास्त्रारि स्वत्वं शास्त्रत्वं चैतदेकदेशो उ
पचारमात्रत्वमेवस्यात्। यथा चक्रवर्त्तिनः स्वत्वं राष्ट्रत्वं मंडलवर्त्तिनामुपचारमात्रं। तिरं
कुशत्वाभावात्॥छ॥ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः। शास्ता दंडधरो नृणां श
शास्तुश्च विवेचनतः॥७॥ यस्मादेवं शास्त्रवक्तृत्वं न घटते अतस्त्वमेक एव शास्ता शास्तृणां शास्तेति विन
ज्ञीति॥छ॥ तस्य ते विहितो दंडो न लोके वर्त्तते धुना। चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभि घटी· २६
ता॥८॥ विप्रलंभिता वंचिता उल्लंघितेत्यर्थः। तदवाक्रः॥छ॥ नीयमानं तवादेशात्स्व।

स्मात्रियमितात्रदृंदात्वमेव चयनस्मात्तु किंनं छित्वा पाशान्प्रसह्यता॥९॥ ते सिद्धाः प्रसह्य
द्गत्वपातकिनं व्यमोवयन्॥छ॥ स्तैतां वदितुमिच्छामो यदि तो मन्यसे क्षमं। नाराय
णेत्यभिहिते मा भैरित्याययुर्द्रुतं॥१०॥ यदि तोः स्माकं क्षमं हितं मन्यसे अन्यथा अज्ञा
नतः तदवज्ञाने नतवाप्यनर्थः स्यात्। अत घोपिहितेषां प्रभावः। यतो नारायणे
ति केवलमभिहिते मा भयं कुर्विति वदंतः शीघ्रमागताः॥छ॥ श्रीशुक उवाच॥ इ
ति देवः समापृष्टः प्रजासंयमनो यमः। प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः॥११॥
संयमयतीति तथा॥छ॥ धर्मराज उवाच। परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पट

वयत्रविश्वं। यदंशतोस्यस्थितिजन्मनाशानस्योतवद्यस्यवशेहिलोकः॥१२॥ मंत्रोत्योजग स्प
तस्तस्थुषश्चपरोधीश्वरोसि। अदंतुजंगमानामेवतत्रापिहृणामवात किंकरःसनृहीश्व
रः। सत्तुसर्वेश्वरःकोसौ। यत्रयस्मिन्विश्वंऊतंप्रोतंच। ऊर्ध्वतिर्यक्तंतुषुपटवत्। यस्य
ववशेलोकोवर्त्तते॥ठ॥ योनामभिर्वाचिजनंनिजायांबध्नातितंत्यामिवदामभिर्गाः। य
स्मैबलिंतइमेनामकर्मनिर्बंधबद्धाश्चकितावहंति॥१३॥ नामिकायांप्रोतबलीवर्द्दव षटी.
त्। एतत्प्रपंचयति। ब्राह्मणादिनामभिर्वाचायांनिजायांतंत्यांदामत्यांयोजनंबध्ना २१
तिदामभिर्गाःबलीवर्द्दानिवातएवजीवाःनामकर्मभिर्निबंधैर्बद्धाःयस्मैबलिंव

हंति। यदधीनाःकर्मकुर्वंतीत्यर्थः। यस्यबलीलाउर्विजायैव्योत्पादा। अदमितिधात्वं
॥ठ॥ अदंमदेंद्रोनिरृतिःप्रचेतासोमोग्निरीशःपवनोविरंचिः। आदित्यविश्वेवसवो
थसाध्यामरुद्गणारुद्रगणाःससिद्धाः॥१४॥ अन्येचयेविश्वसृजोमरेशाःभृग्वादयोस्पृ
ष्टरजस्तमस्काः। यस्येहितंनविदुःस्पृष्टमायायाःसत्त्वप्रधानाअपिकिंततोन्ये॥१५॥ नस्पृष्ट
रजस्तमश्चश्चयैः। ईहितंअपित्रेतंचेष्टितंवानविदुः। यततःस्पृष्टमायाः। माययास्पृष्ट
ाःततस्तेभ्योन्येनविदुरितिकिंपुनर्वक्तव्यं। तस्माद्यायामोहितवात्तनजानंतीत्युक्तं।
स्यविषयत्वाद्वतस्यमायाज्ञाः। यमिति॥ठ॥ यंवैनगोत्रिर्मनसासुभिर्वारुद्वागिरावासुर

भा॰

नोविचक्षते।आत्मानमंतर्हृदिस्थंनमात्मनांचक्षुर्यथैवाकृतयःस्वतःपरं।१४।अस्यतुस्तुतोज
नाःयंजगदीश्वरंगोगिरिंद्रियैःछंदा।चित्तेनगिरावाणपानजानंति।तथावक्ष्यति।यद्वाच
नस्पृदितंयन्मनोनमनुतेत्यादिश्रुतेः।आत्मनांजीवानांआत्मानंद्रष्टारं।आकृतयोरूपा
णियथाकर्मभूतंचक्षुर्नजानंति।यतस्तुतःपरं।आकृतीनांप्रकाशकं।नद्विप्रमाताप्र
माणस्याविषयः।एवंभूतःपरमेश्वरोमनोऽत्योक्ष्मीतिसंबंधः।सवावैवंभूतोत्यःपरमेश्वरः।
येऽवनःसुप्रसन्नान्निजर्षेस्येपापिनंरक्षतितवंतस्तेके।तानाह।तस्यैतिद्वाभ्यां।१५।तस्यात्मतंत्र
स्यहरेरधीशितुःपरस्यमायाधिपतेर्महात्मनः।प्रायेणदूताइहवैमनोहराश्चरंतितद्रूप

षष्ठी॰
२८

गुणस्वभावाः।१५।तस्यैवरूपंगुणाःस्वभावादयःस्वभावोभक्तवात्सल्यादिर्येषांतेदूता
ःइदंलोकेभक्तानामुद्धरणार्थंचरंति।१५।भूतानिविष्णोःसुरपूजितानिदुर्दर्शलिंगा
निमहाद्भुतानि।रक्षंतितद्भक्तिमतःपरेभ्योमत्तश्चमर्त्यानथसर्वतश्च।१६।विष्णोर्भूता
निभृत्याःदुर्दर्शानिदृष्टुमशक्यानिलिंगानिरूपाणियेषांतानि।तद्भक्तिमतोविष्णुभ
क्तान्परेभ्यःशत्रुभ्यःमत्तःयमादिभ्यःअथसर्वतःशत्रुभ्यादिभ्यश्चरक्षंति।ननुविष्णुभक्ताश्चे
त्कथमधर्मप्रसक्तपापंकृतवंतः।तत्राह।धर्ममिति।१७।धर्मंतुसाक्षाद्भगवत्प्रणीतंनवै
विदुर्ऋषयोनापिदेवाः।नसिद्धमुख्याअसुरामनुष्याःकुतश्चविद्याधरचारणादयः

यः ॥१९॥ ऋषयो ऽत्र यमादयः । ननु के पि वेत्र ज्ञानंति तद्धितस्य प्रयत्ने किं प्रमाणं । तत्राह । स्वयं
भू रिति ॥ ब ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः । प्रह्लादो जनको भीष्मो बलिर्वैया
सकिर्वयं ॥२०॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः । गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृत
मश्नुते ॥२१॥ कुमारः सनत्कुमारः । वयमित्यात्मानामेव बहुमन्यमानो निर्दिशति । हे भटाः
गुह्यं अतीन्द्रियमोऽत्र प्रकाशकं । विशुद्धं शुद्धांतःकरणे जायमानं । अत एव दुर्बोधं । यत्
ज्ञात्वामृतं मोक्षं समश्नुते प्राप्नोति । तमेव धर्ममाह । एतावानिति ॥ ब ॥ एतावानेव लोके ऽ
स्मिन् पुंसां धर्मः परः स्मृतः । भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥२२॥ तन्नामग्रहणं

षटी·
२७

यस्य भक्तियोगस्य । आदिः प्रथमं कारणं । न चात्र प्रमाणवक्तव्यं न किंच ज्जिद्दृष्टत्वा दित्याह । ना
।नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः । अजामिलो पि येनैव मृत्युपाशादमुच्यत ॥२३॥
येनैव केवलेन सकृदुच्चारितेन । ननु नामाभासेन कथं सर्वपापक्षयः स्यात् । अवधानस्याद्
स्यादेरप्यविधानात् । तथा हि । सायंप्रातर्गृणन् भक्त्या दुःखग्रामो विमुच्यत इति । अनुदिन
मिदमादरेण शृण्वन् ॥ श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्मगुणानां च तदर्थेऽखि
लचेष्टितमित्यादि । अस्मिन्नेव पुराणे तत्र तत्र पठ्यते । पुराणांतरे च । पापद्वयश्च भवतिस्म
रतां तमहर्निशं ॥ अत्रैव च ॥ तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां । महतामपिकौर

मु

व्यविध्यैकांतिकनिःश्रेयसमित्यादिना । ननु तथा सति किमिति मन्वादयो वादशास्त्रादीनि स्म
रंतु । तस्मादिदमनुपपन्नमिव । तत्राह । एतावतेति । २४ ॥ एतावतालमघनिर्हरणाय पुंसां सं
कीर्तनं भगवतो गुणकर्मनाम्नां ॥ विक्रुश्य पुत्रमघवान् यदजामिलोपि नारायणेति म्रिय
माण इयाय मुक्तिं । २४ भगवतो गुणानां कर्मणां नाम्नां च संकीर्तनमिति यत् । एता
वता पुंसां अघनिर्हरणाय पापक्षयमात्राय अलं । अलं शब्दो निवारणे । अजामिलो महापा
तक्यपि नारायणेति विक्रुश्य पुत्रं कीर्तयतः तच्च पुत्रं विक्रुश्य उद्दिश्य । अघवान् अत्र विरू
पि । म्रियमाणः अस्वस्थचित्तोपि मुक्तिमवाप । न च अघनिर्हरणमात्रं । अतो नामापराधेनापि सर्व

षटी·
३०

पापक्षय इत्येव तत्त्वं । आह निःश्रेयसादि विविधस्य तु पापवासनाक्षयार्थाः । इत्युक्तमेव द्वारेण
नुवादः । यदुक्तं व्यर्थं वादशास्त्रादिस्मरणमिति । तत्राह । प्रायेणेति । २५ ॥ प्रायेण वेद तदिदं न
महाजनोयं देव्या विमोहितमतिर्बत मायया अलं । त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्मणि युज्यमानः । २५ महाजनो मन्वादिरयं स्वावः । यथास्ततजीवनोष
धिमज्ञानं तो वेद्या रोगनिर्हरणाय त्रिकटुकादीनि स्मरंति । तथा स्वयं तु शांतु प्रमुखवाद
शास्त्रव्यतिरेकेण अयं महाजनो अतितुच्छमिदमज्ञानाद्वा वादशास्त्रादिकं स्मरंति । किंच ॥ मा
यया देव्या विमोहितमतिरयं जनः मधुमधुरं यथा स्वल्पं वं पुष्पितायां पुष्पस्थानीयैरर्थवादै

र्मनोदरायांत्रय्यांजडीकृताअमितिविद्यामतिर्येषांअतोमहत्येवकर्मणिश्रद्धयायुज्यमा।
नानाल्पेवर्त्तते। इत्यपेते दि। प्रायशस्तस्यलोकस्यमहतिमहत्त्वेयत्नसाध्येकर्मणिश्रद्धा। अल्पे
नामकीर्त्तनादावश्रद्धा। तस्माद्दस्यप्रायिकोनत्रविष्यतीतिमद्यतेनोक्तं। अथवा। स्वाधीन
सिद्धेस्तिएतास्वंश्रृगालादिनिवारणायतेमिद्धंयथानप्रयुंजते। तथाश्रृगालस्थानीयस्यपा
पस्यअतितुछत्वात्तन्निरसनायपरममंगलंहरेर्नामनसंस्मरंति। स्मरंतिवा। यस्यस्मृत्याचेतिय षष्टी·
था। नाममात्रात्म्यज्ञानेसर्वप्रक्तिप्रसंगात्यज्ञादीनामश्रद्धास्यात्। इतिमद्यतेमत्वादितिर्भु। ३१
रप्यतयानोक्तं। किंतुगोणत्वेन। यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु अत्रक्रियायाः

सुरख्यत्वं। ग्रंथविस्तरतयातुनातिप्रपंच्यते। ।८। एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मना।
विदधतेखलुभावयोगं। तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः। २६
सुधियोविवेकिनःभावयोगंभक्तियोगं। अमीषांपातकंनस्यादेव। यदिस्यात्तर्हि उरुगायवा
दः विष्णोर्नामकीर्त्तनंपातकंहंति। तदेवंधर्मतत्वंनिर्णीयकृत्यानतुत्रास्ति। तेदेवइति। ।८। ते
देवसिद्धपरिगीतपवित्रगाथायेसाधवःसमदृशोभगवत्प्रपन्नाः। तान्नोपसीदतहरेर्गदया
भिगुप्तान्नैषांवयंनचवयःप्रभवामदंडे। २७ येभगवंतंप्रपन्नाः। तेदेवैःसिद्धैःपरिगीतप
वित्रगाथा। वर्णितपवित्रकथा। अतस्तान्नोपसीदत। तत्समीपमपिमागछंत। तेषांदंडेव

यंवयःकालादप्योपितप्रभवः।तंप्रसमर्थाः।तेषांज्ञापकेलिंगं।हरेर्गदयादिष्टत्वान्।नर्हिदंडा।
र्थंकिञ्चित्तेयातत्राह।ताति ति ति पात्र्यां॥७॥तानानयध्वमसतोविमुखान्मुकुंदपादारविं
दमकरंदरसादजस्रं।निष्किंचनैःपरमहंसकुलैरसंगैर्जुष्टाद्गृहेनिरयवर्त्मनिबद्धतृष्णान्।२८
असतःदुष्टान्।तानेवाह।मुकुंदपादारविंदयोर्योमकरंदस्तद्रूपोरसः।तस्माद्विमुखान्।श्रीकृ
ष्णकथाश्रवणेश्रद्धादीनुत्तान्।कथंभूतात्।निष्किंचनैःरजस्तंजुष्टात्।तेषांज्ञापकमाह।नि
रयवर्त्मनिस्वधर्मशून्येगृहेबद्धतृष्णान्।किंच॥७॥जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चन घटी· ३२
स्मरतितच्चरणारविंदं।कृष्णायनोनमतियच्छिरएकदापितानानयध्वमसतोकृतविष्णुकृ।

त्यान्।२९अतएषांजिह्वाभगवद्गुणान्नवक्तिनिरयवर्त्मनिदेहेगृहेवाबद्धतृष्णान्।क
थंभूतेदेहेस्वधर्मशून्ये।अतएवतत्कृतंविष्णुकृत्यंभगवद्भक्तंमोदासंवादियेवाहिद्गोहये
ःकृत्यं।तानानयतयूयं।भगवंतंस्मापयति॥७॥तत्रप्रतांसभगवान्पुरुषःपुराणोनारा
यणःस्वपुरुषैर्यदसत्कृतंनराणामहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिनमःपु
रुषायभूम्ने।३०स्वपुरुषैरस्मदीयैर्येनस्थितैःस्वीयैरेवपुरुषैःयत्यस्मात्असतत्अन्या।
यंकृतं।तत्तस्मात्स्वयमेवक्षमतां।स्वानांस्वीयानांनःअविदुषांकृतानांक्षमांकरोतुभग।
वान्यस्मात्गरीयसिद्दमापुर्केवा॥७॥श्रीशुकउवाच॥तस्मात्संकीर्तनंविष्णोर्जगन्मंगल

मंदस्य। मद्दत्तामपि कौरव्य विष्ठोकांतिकनिःकृतिं॥३१॥ तस्माद्विष्णोः कीर्तनं जगतोपि मंगल
रूपं न केवलं स्वस्य। एकांतिकत्वमेवाह। शृएवतामिति॥७॥ शृएवतां गृणतां वीर्याएयुद्दामा
नि हरेर्मुहुः। यथा सुतप्तो यो तेन कक्ष्याशुध्येन्नात्माव्रतादिभिः॥३२॥ व्रतैः यमनियमतीर्थस्नाना
दिभिः तथा आत्मा अंतःकरणं न शुध्येत्। एतदुपपादयति॥७॥ कृष्णांघ्रिपद्ममधुलिट् न
पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु। अन्यस्तु कामहत आत्मरजः प्रमाष्टुमीहेत क
र्मयत एव रजः पुनः स्यात्॥३३॥ श्रीकृष्णांघ्रिपद्मयोर्मधुलेहि आस्वादयतीति तथा। मधुलि षटी· ३३
हताह्नुष्ठत्वेन विसृष्टेषु मायागुणाः विषयाः तेषु पुनर्न रमते। अन्यस्तु तन्मधास्वादरहित

अत एव कामादिभिः हतः सन् आत्मनो रजः पापं प्रमाष्टुं कर्मैव प्रायश्चित्तरूपमीहेत। यतः क
र्मणः पुरंतेपि रजः पापं स्यादेव। स च बोधकत्वाभावात् कुंजरशौचवदिति। यस्तु तमाह। इ
त्वमिति॥७॥ इत्थं स्वजन्मगदितं भगवत्मदिवं संस्तुत्य विस्मितधियो यमकिंकरास्ते। ते वा
च्युताश्रयजनं प्रविशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन्॥३४॥ नैव विस्मितधि
यः केवलं बभूवुः किं तु असत्यमेवमेनिरे। स्वयं दृष्टत्वात्। ततः प्रभृति प्रविशंकमाना अस्मा
नेवैष हत्यादिति शंकां वदंतः तं अच्युताश्रयं द्रष्टुमपि बिभ्यति। वक्तुं पिहितमील्पयांती स
म॰ र्थः॥७॥ इतिहासमिमं गुह्यं भगवान् कुंभसंभवः। कथयामास मलय आसीनो हरिमर्च

यत्॥३४॥ कुंभसंभवोऽगस्त्यः। मलयपर्वतेस्थासीनो हरिमर्चयन्निति तत्र नः॥३५॥ नर्ममविश्वास-
र्थं हरेः पादौ स्पृशन्नित्यर्थः॥३६॥ ॥इतिश्रीभागवते महापुराणे षष्ठस्कंधे अजामिलो-
पाख्याने तृतीयोऽध्यायः॥ ॥३॥ ॥चतुर्थादित्रिभिर्विश्वरूपजन्मविवयोक्ते। प्रचेतस्तु
तदक्षस्य वंशावलिः प्रतन्यते॥ चतुर्थे तु प्रजासृष्टौ दक्षेणाराधनं हरेः। तपसा हंसगुह्या-
ख्यस्तोत्रेण च निरूप्यते॥ प्रसक्तानुप्रसक्तेन स्वायंभुवसुतान्वये नामप्रभावमाकर्ण्य वंश- षटी.
व्यासं तु पृच्छते॥१॥ राजोवाच॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणां। सामासिकस्त्वया ३४
प्रोक्तो यस्तु स्वायंभुवेंतरे। सामासिकः संक्षिप्तः स्वायंभुवेंतरे तृतीयस्कंधे॥१॥ तस्यैव व्या-

समिच्छामि ज्ञातुं ते भगवन् यथा। अनुसर्गं यया शक्त्या ससर्ज भगवान् परः॥२॥ व्यासं विस्ता-
रं। तेव नः। यया शक्त्या यथा ससर्ज। तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि। अनुसर्गं अनु-
तं सर्गं। दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह यदेति॥२॥ श्रीशुक उवाच॥
यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः। अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां॥३॥ प्राचीनब-
र्हिषः पुत्राः यदा समुद्रमध्यादुन्मग्नाः निःसृतास्तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः। श्रीनारदोपदे-
शात् प्राचीनबर्हिषो निवृत्यारण्यराजके रक्ष्याभावात् द्रुमैर्वृतामित्यर्थः॥३॥ द्रुमेभ्यः क्रु-
ध्यमानास्ते तपोदीपितमन्यवः। मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया॥४॥ तपसादीपि

तोमन्युर्येषां ते। तेषां द्रुमाणां दग्धुमिच्छया। उत्थितो वायुरग्निश्च समसृजत ॥ ॥ ताभ्यां निर्दह्य-
मानांस्तानुपलभ्य कुरूद्वह। राजोवाच महान् सोमो मन्युं प्रशमयन्निव। पताभ्यां वाय्वग्नि-
भ्यां दह्यमानान् द्रुमान् दृष्ट्वा वनस्पतीनां राजा सोम उवाच॥ मा द्रुमेभ्य इति नवभिः ॥ ॥ सो-
म उवाच॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ। विवर्धयिषवो यूयं प्रजानां पतयः स्मृ-
ताः। हे महाभागाः विशेषेण वर्धयितुमिच्छवो यूयं ॥ ॥ अहो प्रजापतिः भगवान् हरिरव्य-
यः। वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः। प्रजापालानां पतिर्हरिः। ऊर्जं रसं इषं षटी· २५
अन्नं ॥ ॥ अन्नं चराणामचराः अपदः पादचारिणां। अहस्ता हस्तयुक्तानां द्विपदानां चतुष्पदाः ॥९

चराणां जंगमानां अचराः व्रीह्यादयः ॥ ॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः। प्रजास-
र्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥१९ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं। पित्रा पिता-
महेनापि जुष्टं वः प्रपितामहैः ॥२० आतिष्ठत आश्रयत। सतां मार्गं उपशमं। पित्रादिभिर्जुष्टं
प्रजानां पतिरेव बंधुः अतस्तज्जो विकानाशो न कर्तव्यः इति दृष्टांतपंचकेनाह। तोकानामि-
ति ॥ ॥ तोकानां पितरौ बंधू दृशः पक्ष्म स्त्रियः पतिः। पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सु- पं ३
हृत् ॥२१ तोकानां बालानां मातापितरौ बंधू। रक्षणपालनात्। अज्ञानां ज्ञानदो बंधुः। एवं सु-
हृदीश्वराधिष्ठानात् वृक्षद्रोहो न युक्त इत्याह। अंतर्देहेष्विति ॥ ॥ अंतर्देहेषु भूतानामात्मा॥

त्मास्ते हरिरीश्वरः । सर्वतश्चिन्त्यमीशानं ध्येयमेवं वदन्तो षिह्यो ॥ ११ ॥ वः स्थुष्मा । निःस्पृहो हरिरिच्छे
षितो न विष्यति ॥ ब ॥ यः समुत्पतितं देहं आकाशान्मनुजोत्तमं । आत्मजिज्ञासया यच्छेत्
स गुणानतिवर्त्तते ॥ १२ ॥ आकाशात्तु कस्मात् तद्देहं समुत्पतितं क्रोधं आत्मविचारेण यो नि
यच्छेत् स त्रीन् गुणान् जयति ॥ ब ॥ अलं दग्धैर्ईमैर्दानैः खिलानां शिवमस्तु वः । वार्षंचे ।
षावरारोहा पत्नी वे प्रतिगृह्यतां ॥ १४ ॥ खिलानां शेषाणां वत्युभ्मसकाशात् शिवमस्तु इत्य
रक्षणार्थं तदीयां कन्यां ददाति । वार्षं हरिद्विः पालिता ॥ ब ॥ इत्यामंत्र्य वरारोहां कन्यामा
त्मवरस्त्रीरूपा । सोमो राजा ययौ दत्वा ते धर्मेण पयेमिरे ॥ १५ ॥ आमंत्र्य सा च ययौ । चक्षुरसः

षटा.
३६

प्रम्लोचायाः कंडोः समकाशाउत्पन्नां सुतां दत्वा ययौ सोमः ॥ ब ॥ तेभ्यस्तस्यामथोत्पन्नो दक्षः
प्राचेतसः किल । यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १६ ॥ यथा ससर्ज भूतानि दक्षोऽ
हिष्टवसत्तः । रेतसा मनसा चैव तन्मा मा वदितश्टणु ॥ १७ ॥ दिष्टवसत्त इति तस्य कन्या वंश
एवेत्युक्तं । मम मन्तः ॥ ब ॥ मनसैवाग्रजस्पूर्वं प्रजापतिरिमाः प्रजाः । देवासुरमनुष्यादीनन
न स्थलचनौकसः ॥ १८ ॥ प्रजापतिर्दक्षः ॥ ब ॥ तमहंहितमालोक्य प्रजासर्गं प्रजापतिः । वि
ध्यपादानुपव्रज्य सो चरद्दुष्करं तपः ॥ १९ ॥ अहं हितं च संदष्टं । विंध्यस्य पादान् सतितिहित
पर्वतान् ॥ ब ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परं । उपस्पृश्यानुसवनं तपसा तोषयद्ध

रि॥२०॥ अनुसवनं त्रिकालं।८॥ अश्रौषीदं सगुणेन नमगवंतमधोक्षजं। तस्यं तदभिधास्यामि
कस्मात्तुष्यद्यतो हरिः॥२१॥ कस्य दक्षस्यायतः यस्मात्स्तोत्रात्।८॥ दक्षउवाच॥ नमः पराय
वितथानुभूतये गुणत्रयाभास निमित्तबंधवे। अदृष्टधाम्ने गुणतत्वबुद्धिभिः निवृत्तमानाव
धये स्वयंभुवे॥२२॥ परायपरमश्रेष्ठमायनमः। अवितथा नित्या अनुभूतिश्चित्क्रिया यस्या अतो
गुणत्रयाभासो जीवः। तन्निमित्तं माया। तयोर्बंधवे नियंत्रे। एवमपि गुणेषु तत्त्वबुद्धिर्येषां
तैरदृष्टं धाम स्वरूपं यस्य। तत्र हेतुः निवृत्तमानावधये। निवृत्तं मानं अहंकारो यस्मात्। तर्हि ष·टी·
कथं तस्य सिद्धिरित्यत आह। स्वयंभुवे स्वप्रकाशाय। अदृष्टधामत्वे दर्शयन्नाह। नयस्येति भिन्न ३४

यस्य सख्युं पुरुषो वेति सख्युः सखा वसन् संवसतः पुरेऽस्मिन्। गुणो यथा गुणिनो व्यक्तदृ
ष्टस्तस्मै महेशाय नमस्करोमि॥२३॥ पुरुषः सखा जीवः अस्मिन् पुरे देहे वसन्नपि तत्रैव संवस
तः सख्युः यस्य सख्यं करणप्रवर्तकत्वादिकं नावेति न जानाति। तस्मै नमः। कुतः। व्यक्तदृष्टे
ः प्रपंचदृष्टुः न हि द्रष्टा दृश्यो भवति। प्रथमांतपाठे व्यक्ते प्रपंचे एव दृष्टिर्यस्य स। गुणो वि
षयो गुणिनो विषयिणः इंद्रियादेः सख्यं प्रकाशकं यथा न वेत्ति तद्वत्। ननु गुणो जडत्वा
न्मा जानातु। जीवस्तु चेतनः किमिति न जानाति तत्राह। देहइति।८॥ देहोऽसवोऽक्षा मनवो
भूतमात्रा नात्मानमन्यं च विदुः परं यत्। सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतं

मीडे ।२४। देहश्चक्षुरसनश्रवणघ्राणाःख्यानींद्रियाणि मनश्चांतःकरणानि । मनबुद्धिचि

त्ताहंकाराणि । भूतानि वमात्राश्च तन्मात्राणि । आत्मानं स्वस्वरूपं दृश्यं अत्यं इंद्रियवर्गैत

यो: परं देवतावर्गैर्व विदुः । पुमान्जीवस्तु सर्वमेतत्त्रयं वेद तन्मूलभूतान्गुणान्वेद । तज्ज्ञोपि

सन्यं सर्वज्ञं न वेद । तमनंतं दीडेह्योमि । अदृष्टध्यानमचक्षुःकाश्वप्रकाशाच मार्द्धा । यदा ते ।३।

यदोपरामो मनसो नामरूपस्वरूपस्य दृष्टस्मृतिसंप्रमोषात् । यदीयते केवलया स्वसंज्ञया दृं

साय तस्मै शुचिसद्मने नमः ।२४। यदा मनसः उपरामः समाधिः न तु सुषुप्ता विलयः । तत्र

जाग्रत्स्वप्नयोरिव विक्षेपः । यदा द्वार्नामरूपे रूप्यते येन । तत्तथा । तस्य तु परमे हेतुः दृष्टं दर्शनं प्र.टी. ३८

स्मृतिश्च तयोः संप्रमोषात् नाशात् तदयः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै इदं साय

शुद्धाय शुचिशुद्धं मनः सद्म प्रतीतिस्थानं यस्य । तस्मै नमः । एवं भूतः केषां प्रतीयत इति

अपेक्षायामाह । मनीषिण इति द्वाभ्यां ।३। मनीषिणोंतर्हृदि संनिवेशितं स्वशक्तिभि

र्नवभिश्च त्रिवृद्भिः । वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षंति गूढं ।२५ विवे

किनो यं निःकर्षंति विविच्य ध्यायंति । स निर्वाणसुखानुभूतिः मम प्रसी[illegible]तामिति ह्व

यो रन्वयः । एवं निःकर्षंतां प्रतीयत इति भावः । किमिति निःकर्षंति । स्वशक्तिभिर्गूढं

। कतिभिः । नवभिः भूतश्च त्रिवृद्भिः त्रिगुणात्मकाभिः । सप्तविंशत्युपाधिभिर्गूढं । प्रकार

त्षोडशाविकाररूपा।तिष्ठा।कथंभूतं निःकर्षति।मनीषया अंतर्हृदि संनिवेशितं निश्च
लीकृतं।पंचदशसामिधेनीमंत्रैः प्रकाशमानं।अलौकिकं बर्हिमिवाहंकारास्पदादात्म
नोत्थं परमात्मानं निःकर्षतीत्यर्थः।७।सदैव ममाशेषविशेषमायानिषेधनिर्वाणसु
खानुभूतिः।सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः।२८।अशेषवि
शेषायस्याः।तस्याः मायायाः निषेधेन निर्वाणसुखे अनुभूतिर्यस्मात्।अप्रसक्तिनिषेध
संभवात्।अप्रसक्तिमाह।स एवेति।स एव सर्वनामा स एव सर्वरूप इति।तद्रूपत्वेपि वाङ्म
नसागोचरत्वात् निषेधः संभवतीत्याह।अनिरुक्ता आत्मशक्तिर्मायाख्या यस्यासौ।नञ्

षटी·
३८

यदि केवलया स्वसंस्थया प्रतीयते तर्हि सर्वं विश्वरूपत्वं चानुपपन्नं।वागगोचरत्वादि
त्याशंक्य सर्वैर्नामभिर्वाच्यं।प्रत्यक्षादिदृश्यं च तस्य स्वरूपं वस्तुतो माभूत् तथापि मायया घ
टत इति श्लोकत्रयेणोपपादयन्नमस्करोति।७।यद्यन्निरुक्तं वचसा निरूपितं धिया।
क्षिभिर्वा मनसोत यस्य।माभूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः।२९
यद्यद्वचसा निरुक्तं अभिहितं।धिया निरूपितं व्यवसितं।अक्षिभिर्वा इंद्रियैर्दृष्टं।तेनत
अपि मनसा संकल्पितं।यस्य स्वप्रकाशकचैतन्यस्य तत्स्वरूपं माभूत्।स्वरूपत्वाभावे हे
तुः।हि यस्मात्तत्तद्गुणानामेव रूपं।परिणामं तर्हि गुणैरेव छिन्नं।सत्गुणव्यतिरिक्तः यतो गुण

तामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा। चेतनाधिष्ठानं विना तयोरसंभवा
त्। यद्वा। यस्यस्वरूपं मायत्तं भवति। तस्मैनमस्त्विष्टतीयेनान्वयः। तदेवं वस्तुतः स्वरूपाभाव
मंगीकृत्यश्रुतिफक्कामत्राक्षिरित्यनेनद्योतितं मायया सर्वव्याप्त्वेन विश्वरूपत्वमादाय
स्मिन्निति॥४॥ यस्मिन्नुपलोयेन च यस्य यस्मै तं तं यथाकुरुते कार्यते च। परावरेषां परमंत्र
कृत्स्नसिद्धं। तद्ब्रह्मतद्धेतुरनन्यदेकं॥२८॥ यस्मिन्नधिकरणे यतोपादानतः येन करणेन। य
स्य संबंधियस्मै संप्रदानाय। यत् इप्सिततमं यः कर्ता कुरुते स्वतंत्रः। कार्यते वान्येन। कर्त्रा
तद्ब्रह्मेति। क्रमेकं संबंधः। अत्र सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिता। यथे च क्रिया कार पटी· ४०

कसंबंधप्रकारवाचिना अप्पया तामर्थाः संग्रहीताः कुरुते कार्यते चेति स्वार्थपरार्थक्रिया
द्वयमप्यसर्वेषां दर्शितः। चदृष्टेन तत्रावकर्मादि विहितप्रत्ययार्थाः संग्रहीता। तद्ब्रह्मेवेति। उ
तस्मात्। यद्धेतुस्तेषां कारणं। तत्कुतः सर्वस्य अपसिद्धं। नन्वब्रह्मादयस्तद्धेतवः श्रूयंते अव
रेवहरूपं त। तत्कथं ब्रह्मैव तद्धेतुस्तस्मात्। परेषामवरेषां च दृष्टानां परं कारणं। ननु सर्वकार
णं चेत्तस्य किं तामसहकारित्वेन। तदानीमन्यस्य पासावात्। सत्यं। निरपेक्षमेव तत्कारणमि
त्याह। एकं सजातीयस्वगतं। अनन्यं विजातीयशून्यं। स्मै तेन मस्तुकरेणान्वयः। न त्वेवं ब्रह्म
चेद्विश्वस्यहेतुः तर्हि न कदाचिदनीदृशं जगत् इति वदंतो मीमांसकाः कुतोऽत्र विवदंते। तत्र

हा॥७॥ यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति। कुर्वंति चैषां मुहुरात्ममोहं त
स्मै नमोऽनंतगुणाय भूम्ने।२९ तस्य मायाख्यविद्यायाः शक्तयो विवादस्य कलहस्य संवादस्य भुवः
स्थानानि भवंति। तस्मै नमः। ननु किं तद्ब्रह्म यच्छक्तयो विवादादिभुवो भवंतीत्यत्राह॥७॥ अस्ती
ति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मिणोः। अवेक्षितं किंचन योगसांख्य
योः समं परं ह्यनुकूलं बृहत्तत्।३० योगः उपासनाशास्त्रं। तत्र हि विराड्रूपेणोपासनायां पाताल षटी· ४२
पादादिकं अस्तीत्युपास्यत्वेन विधीयते। नास्तीति सांख्यं ज्ञानशास्त्रं। तत्र अपाणिपादः अचक्षु
रश्रोत्रमिति च पादादिर्नास्तीति निषिध्यते। तयोर्योगसांख्ययोः यत्किंचित्समं अनुवर्तमा

नं अवेक्षितं प्रतीतं तद्बृहद्ब्रह्म विवादास्पदं भवतीत्यर्थः। विवादं स्फुटयति भिन्नेत्यस्ति ना
स्तीत्येवं रूपौ विरुद्धौ धर्मौ ययोः तयोर्भिन्नविषयत्वे विरोधो न स्यात्। एकस्थयोरित्युक्तं। एक
विषययोः। कुतः वस्तुनिष्ठयोः। पादादिविषयत्वात्। तर्हि तथाविधस्य सद्भावे किं प्रमाणं त
त्राह। अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात्। अवधिं विना तन्निषेधायोगात्।
तयोरुपपादकत्वेन सिद्धमित्यर्थः। तमस्तस्मै इति पूर्वस्मादनुषंगः। ननु उदासीनस्य सम
न· स्यसंमस्कारे को लाभस्तत्राह॥८॥ यो नुग्रहार्थं भजतां पादमूलमनामरूपो भगव
ननंतः। नामानि रूपाणि च जन्मकर्मभिः भेजे स मह्यं परमः प्रसीदतु।३१ पादमूलं भज।

षुवस्तुस्वरूपःसर्वेश्वरःसकलजगत्कारणभूतःसर्वीजत्यगात्मत्वात्सर्वेगुणाभासोप
लक्षितःएकएवपर्यवसायितः।सएवहियोनानारूपेणपतीनःवस्तुस्वरूपःसर्वे
षांगुणानांविषयाणांचाभासैश्चकारोपलक्षितः।अतएवजीवएव।उपलक्षितोनामस

र्वप्रत्यगात्मत्वात्सर्वान्तर्यामित्वात्जडत्वादात्मनःजीवस्यापिजलडप्रायत्वात्तेनतेन
विनाप्रकारेणइतिभावः।पर्यवसायितेनेतितेनीत्यादिस्तुतिपि।।६।।अतएवहृद्वावात
वमहिमाकृतरसमुकुन्दविष्णुघासरूपवलीढायास्वमनपितिस्पंदमानानवरतमु
खेनविस्मारितदृष्टश्रुतविषयसुखलेशाभासाःपरमभागवताबभूवुः।एकांतिनोभग
वतिसर्वभूतप्रियसुहृदिसर्वात्मनितिरत्नमनसः।कथंभूतावाएतेमधुकुतुमथनकृतनः।अर्थ
स्वार्थक्रियालाभाःह्यात्मप्रियसुहृदःसाधवस्त्वच्चरणांबुजसेवांविसृज्यंतिनयत्रपुनर
संसारपर्यावर्तः।अतस्त्वज्जन्किरेवपरमपुरुषार्थः।।अथयस्मादेवंभूतस्त्वंपरमेश्वरःअथ

ह्वावश्यकत एव हि देहमध्रुवमथ न परमभागवताः एते त्वत्पदाब्जानुसेवां कथं त्यजंतः
दिस्तजंतीत्यन्वयः ।। हि यस्मात्स्वार्थं पुरुषार्थैकशाला त्रिगुणाः अतः आत्मा च प्रेमवि
याः सुहृच्च येषां तत्राधवो रागादिक्षेत्रा भवहेतुः । तव महिमैवाष्टतरसप्रभुः तस्य
विप्रुषा बिंदुमात्रेण स्वच्छंदपीलीढया आस्वादितया मनसि निषिद्धं स्मानं ततिशायेन श्र
वणैर्निरंतरं सुखं तेन विस्मारिता दृष्टश्रुतविषयसुखलेशाभासा येषां ते अत एव जग षटी·
वति च थितिरतरां रतं निविष्टं तं च मनो येषां ते । यत्र यया मनुसेवायां मत्तानंदतः संस ८३
रचर्यावर्त्तः परिभ्रमणं । वस्तुतं विज्ञापयंति ।। त्रिभुवने त्यादिना यावदध्यायसमाप्तिः ।

स्यः ।। त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतये
दितिजदनुजादयोपि न तेषामुपक्रमसमयोयमिति ।। हे त्रिभुवनं आत्मस्वरूपं भवनं
यस्य त्रिभुवनस्यात्मा भुवनं वेति । त्रयो विक्रमा यस्य । त्रीन् लोकान् नयतीति त्रया । त्र
याणां लोकानां मनोहरोनुभावो यस्य । एवं चतुर्भिः संबोध्योक्तः । न तेषामुपक्रमसम
यः उद्यमकालोयं न भवतीति मया ।। ७ ।। स्वात्ममायया सुरनरमृगमिश्रितजलच
रात्मतिभिर्यथा पराधं दंडं दंडधर दधर्थ ।। एवमेनं पि जगवन्नहि चाद्य चत्तरत्नासुरं
२... यदिमत्पसे ।। ८ ।। हे दंडधर सूर्वं यथा दंडं दधर्थ धृतवान पि एवं प्रेमेनं चाद्यमपि जहि ।।

।२। इमत्यर्थो। इहस्थिता। अस्माकं तावकानां तवनतानां ततः महत्तवचरणन।
लिनयुगलध्यानानुबंधहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानां अनुकं
पानुरंजितविशदरुचिरशिशिरस्मिरस्मितावलोकेन विगलितमधुरसुखरसास्वादल्मक
लयाचांतस्तापमनयार्हसि शमयितुं ॥४०॥ हे पितः हे पितामह अथ मं तावत्त्वदीयाना
मस्माकं चेतस्तापं शमयितुमर्हसि। तवचरणनलिनध्यानौ जेवानुबंधोहृदये निग
डः स्रृंखलायथा स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानां। केन अनुकंप षटी ८४
यानुरंजितं मानुरागं च तद्विशदं रुचिरं च शिशिरं च स्मितं तस्य हितेनावलोकनेन। त।

यानुकंपयेव विगलितो मधुरो सुखरसः प्रियवचनैवा हृतकलानयाचा। किं चास्मदा
शिषाय चयाज्ञायत एव। किमत्रास्माभिर्विज्ञापनीयमस्ति अथेति। अथ भगवंस्त्वा
स्माभिः अखिलजगदुत्पत्तिस्थितिलयनिमित्ताय मानदिव्यमायाविनोदस्य सकल
जीवनिकायानामंतर्हृदयो स्रुतहरिपिच ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण
यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः सर्वजलायसा
क्षिणः आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिहवार्थ्यविशेषो
विज्ञापनीयः स्यात्॥४१॥ अथ हे भगवन्नतवास्माभिरिह कियोद्यार्थविशेषो विज्ञाप।

नीयःस्यात्॥ तत्तद्व्ययः। यथा हिरण्यरेतसो मेः हदंशा हूते विस्फुलिंगादिपि स्वकाशे
न क्रियते। तथा न वास्माभिः कार्योऽर्थप्रकाराणां तत्कार्यसिद्ध्यर्थः। अत्रेदेहुणार्ज्ञाणिविशेष
णानि। अखिलजगताम् उत्पत्त्यादिभूमिमित्तभूतया पायया विनोदो यस्य। अत एव सर्व
शक्तिकायानामंतर्हृदयेषु प्रत्यस्य रूपेण रत्यगात्मांतर्यामी तद्रूपेण बहिरपि प्रव
धान रूपेण देशकालदेहादिज्ञानविशेषाननुसंधानानुभवतः कथं तेषां प्रत्यासन्नत्याउ पटी·
पलं तत्कसया एवमत एव सर्वेषां प्रत्ययानां भूधारादीनामपि प्रास्तिग्धः। साक्षिवेदेनान्त्र ८५
काशवत्। अखिलदेहशरीरसंत्त्रपंचयस्य। अखिलसत्त्वेदवृत्तुदयं। साक्षात्परब्रह्मणोनि।

रूपाधेः परमात्मनः स्तूयसद्वमूर्ते स्थिता॥ अत एव स्वयं तदुपकल्प्य यास्माकं भगवत
: परमगुरोस्तव चरणशातपलाशछायां निविधद्विजिनसंसार परिश्रमोपशमंती।
उपस्तावयं। यत्कामेनोपसादिताः॥४२॥ अत एव सर्वज्ञ वा देव वयं यत्कामेन यस्य
कार्यस्य कामेनोपसादिताः प्राप्तिः तदस्माकं कार्यं स्वयमेवोपकल्प्य संपाद
येति। चरणमेव शातपलाशंकमलं तस्य छायां। विविधैर्वृजिनैः पापैः संसारपरिश्र
मः तस्योपशमकरी उपसृतानां प्राप्तानां॥ अथ श्लोकः। अथो ईश राजन् दिवौकं
असंतं स्तुवत नत्र यं। यस्मान्नियेतनः ऋक्षस्तेजांस्पस्त्वाज्ञुधावित्वा॥४३॥ सर्वे पक्ते कृत्कृ।

र्थोऽकल्पककामयं कामा मा भूदिति स्वकार्यं कथयंति ॥ अथो अनंतरमेव शीघ्रं चाहं जहि
॥ ३ ॥ हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय सत्सं
ग्रहाय भवपांथ निजाश्रमाप्तावंते परीष्टगतये हरये नमस्ते ॥ ४ ॥ तव ध्याय पुनः स्व
णऽमेति ॥ हंसाय शुद्धाय ॥ हरये आर्तिहराय ते नमः ॥ स्तु स्वेदितवः ॥ दह्रं निलयाया ॥
हृदयाकाशनिकेताय ॥ निरीक्षकाय बुद्ध्यादिसाक्षिणे ॥ कृष्णाय सदानंदरूपाय ॥
कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीय
ते ॥ इति निरुक्तेः ॥ आर्तिहृद्द्रवे देतवः ॥ मृष्टं रूपिकरं यशो यस्य ॥ निरुपक्रमाय अनादि

षष्टी
८६

ध्यायाय ॥ सद्भिः संगृह्यत इति तथा तस्मै सत्संग्रहाय ॥ भवपांथः भवरूपे पथि वर्त्तमानस्त
स्य निजाश्रमाप्तावंते संसारस्यांते परीष्टगतये परीष्टा सर्वतः पूजिता उत्तमा गतिः फलं
यस्तस्मै नमः ॥ ५ ॥ श्रीशुक उवाच ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः ॥ स्वमुपस्था
नमाकर्ण्य प्राह तानभिनंदितः ॥ ६ ॥ अभिनंदितः संभाषितः ॥ ७ ॥ श्रीभगवानुवाच ॥ प्री
तोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ध
इदं मदीयमुपस्थानं स्तोत्रं ॥ तस्य हि तया विद्यया ज्ञानेन आत्मनः ऐश्वर्यस्य संस्मृतिः स्वितस्य
स्मृतिर्यया ॥ न हि विरोध उभयमित्यादिना कर्तृत्ववोक्तत्वादेर्मायिकत्वोक्तेः ॥ भक्तिश्च

यथा भवति । अर्थश्रीभगवन्नित्यादिना नचिकेतः सर्वैः कामैः प्रलोभितमपि तं दति । मैं किंति
बा । किंकुरापं नयिप्रीतेनथा । पि विद्वा धर्षिणः । मय्येकांतमतिर्नान्यत् प्रत्तो वांछति तत्ववित्
। ४१ यदुक्तं देवैः स्व यं लड पकल्पयास्माक मित्यादि तत्संपादनं कृपालोर्ममाङ्गेचितमित्य
र्. येनाह । नवेदमिति द्वाभ्यां । ६ । नवेदरूपणः श्रेयश्चात्मनो गुणवस्तु दृक् । तस्यतानीछते
यछेत् यदीशो । पि तथाविधः । ४२ गुणो भुवि षयेष्ठत नद्व दर्शी तान् तान् विषयान् इच्छत
सका मस्य पथ्येतद्दद्यात् यदि ईशोपि तथाविधोः पंडः एव स्यात् । ७ । स्वयं तिः श्रेयसं वि
द्वान् नव नस्य ज्ञाय कर्म हि । नरा तिरो गिणो ः पथ्यं वांछतो पि भिषक्तमः । ४३ कर्मप्रवृत्ति

षटी ६१

र्जनवच्छिक्षि । यथाभिषक्तमः सद्वैद्यः वांछतो पि रोगिणः यथा अपथ्यं न राति न ददाति । एवं
तत्त्वकथं तेन अत्तो चित्तं परिढ्द्वत्या । तदविद्याय अनुसरन्नाह मघवन्निति । ८ । मघवन्यात
भइंवोदध्यं च मुष्पिमत्तमं । विद्याव्रततपःसारंगाखं याचतमाश्रिरं । ५० विद्याव्रतैस्तेषप
सारं सारं दृढं गात्रं शरीरं या चर्धं तदीयं विद्यादिवायमाह । भवाइति द्वाभ्यां । ९ । भवानधिग
तो दध्यङ्ङाश्विभ्यां ब्रह्म निःस्तुतिं । यया अश्वशिरं नाम तयोरमरतां व्यधात् । ५१ एवं ह्यत्र
प्रसिद्धा कथा । निशम्याथर्वणं दक्षं प्रवर्ग्य ब्रतविद्ययोः । दध्यं च समुपागम्य तमूचतुश्च
श्विनौ । भगवन्देहिनो विद्यामिति श्रुत्वा स चाब्रवीत् । कर्मण्यवस्थितो द्यार्थं पश्चाद्वक्ष्या ।

मिगछतं। तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिं उवाच भिषजो विद्यां मा वादीरक्षितो मुनिं।
यदि मद्वाक्यमुल्लंघ्य ब्रवीषि सद्यस्ताव ते। शिरः छिंद्यां न संदेह इत्युक्त्वा स ययौ हरिः। इंद्रे
गते तथा स्येत्य नासत्यावूचतुर्द्विजं। तन्मुखादिंद्रगदितं श्रुत्वा तावूचतुः पुनः। आवां त
व शिरः छित्वा पूर्वमश्वस्य मस्तकं। संधास्यावस्ततो ब्रूहि तेन विद्यां च नो द्विज। तस्मिन्निंद्रे
ण संछिन्ने पुनः संधाय मस्तकं निजं ते दक्षिणां दत्त्वा गमिष्यामो यथागतं। एतच्छ्रुत्वा तथे
वाच दध्यङाथर्वणस्तयोः। प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशंकित इति। अतस्यायमर्थः ष॰टी॰ ८८
। दध्यङ् निष्कलं शुद्धं ब्रह्मान्वधिगतं ज्ञातवान्। पारं गतो रेखु। निःकृत्तं नितरां कृत्तं प्रवर्तितं धनं

प्रवर्ग्यं चाधिगत इत्यर्थः। ततोऽश्विभ्यां प्रादादित्युत्तरस्यानुषंगः। उपदिदेशेत्यर्थः। कथं
भूतं ब्रह्म। यद्वै अश्वशिरसा प्रोक्तवान् अश्वशिरं नाम प्रसिद्धं तयोरमरत्वं जीवन्मुक्तत्वं च व्य
धात्। तथा च श्रुतिः। अश्वस्य शीर्ष्णा प्रयदीमुवाचेति। ५१। दध्यङाथर्वणस्त्वष्ट्रे वर्माभि
ऐघमहात्मकं। विश्वरूपाय यत् प्रादात् त्वष्ट्रा यत्त्वमधास्ततः। ५२। महात्मकं वर्म श्रीनारा
यणकवचं। अधिगत इति पूर्वस्यानुषंगः। तत्र हेतुः। यद्यस्मात्त्वष्ट्रे प्रादात्। किं तत्
यत्त्वष्टा विश्वरूपाय पुत्राय प्रादात् एवं ततो विश्वरूपादधाः धृतवानसि। तदेवं विद्या
या प्रारंभात्रेया वध्यमित्यत्र यः। ननु प्रेष्ठं देहं कथं दास्यति तत्राह। ५३। युष्मभ्यमिति। गां

युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः। ५२
युष्मभ्यं अंगानि अस्थीनि। याचितः सन् दास्यति। यतो धर्मज्ञः। विशेषतोऽश्विभ्यां शिष्यप्री
त्या दास्यति। ना वयं स्वाङ्गं तद्यमित्युपदेशः। तत्सुखेन याचध्वं। अस्थीनीत्यनेन न देयत्वं दर्शि
तं। तैरस्थिभिर्विश्वकर्मणा विनिर्मितस्त्वायुधश्रेष्ठो वज्रो भविष्यतीति शेषः। ५३। येन वृत्र
शिरो हर्तास्मि तेजउपबृंहितः। तस्मिन्विनिहते यूयं तेजोस्त्रायुधसंपदः। भूयः प्राप्स्यथ भद्रं वो षटी.
न हिंसन्ति च मत्परान्। ५४। येन वज्रेण भवान् वृत्रस्य शिरो हर्ता हरिष्यसि। मम तेजसा ८९
उपबृंहितः सन्। तेजश्च शस्त्राणि चास्त्रायुधानि च संपदश्च भूयः प्राप्स्यथ। ननु महाकायः

स्त्रिभुवनग्रासी स एवास्मान् हन्यादिति शङ्कां काङ्क्षलितविनाप्रत्याह। मत्परांश्च केपि न
हिंसन्ति। अतो युष्माकं भद्रं पयाम इदमेव। ५५।। ।।इतिश्रीभागवते महापुराणे षष्ठस्कंधे
विश्वरूपोपाख्याने वृत्रासुरवधे नवमोध्यायः।। ।।९।। ।।दशमे केशवादिष्टदध्यङ्ङस्थि
जवज्रधृक्। इंद्रो युध्यत वृत्रेण सासुरेण सनिर्जरः। १। श्रीशुक उवाच।। इंद्रमेवं समादि
२५ श्य भगवान्भूतभावनः। पश्यतामनिमेषाणां तत्रैवांतर्दधे हरिः। १। तथाभियाचितो दे
वैर्ऋषिराथर्वणो महान्। मोदमान उवाचेदं प्रहसन्निव भारत। २। मोदमान एव। तन्मु
खात् धर्मं श्रोतुकामः। प्रत्याचष्टे इत्याह। अपीति। ३। अपि वृन्दारका यूयं न जानीथ शरी

रीरिणां। संस्थायां यस्त्वसिक्रोदोद्भवः सद्दृश्चेतनाप्रहः।२३ इदं दारकाल्प्यपि किं संस्थायां स्थैर्ये
त्वमिक्रोहोद्भवः खं न जानीथ। यतोऽमरा यूयं।२४। जिजीविषूणां जीवानां आत्मा प्रेष्ठ इदे
प्सितः। क उत्सहेत तं दातुं। भिक्षमाणाय विष्णवे। धन्यात्मा देहः प्रेष्ठः। वयं न जानीम एव।।
किंतु। प्राह। विस्तुरस्मत्सुखेन यावत् दृतिचेत। तत्राह। विष्णवेपि दातुं क उत्सहेत।२५। देवा
ऋतुः। किंतु तद्दुस्त्यजं ब्रह्मन् पुंसां भूतानुकंपिनां। एवं विधानां महतां उ एषश्लोके घृक
र्मणां। पञ्च एषश्लोके रीडितानि स्तुतानि कर्माणि येषां तेषां वः।२६। नूनं स्वार्थपरो कोलोन
वेदपरसंकटं। यदि वेद न याचेत नेति नाह यदीश्वरः। याचको यदि परस्त्वं वेद तर्हि न या षटी। ९०

चेत। यदि शीश्वरो दातुम् अर्थित्या बकद्भः खं जानाति तर्हि सोपि नेति ना दात्रतो यथा वयं तत्वं
कटं स्वार्थपरा न जानीमः। एवं प्रत्याचष्टारणस्त्वमप्यस्मत्संकटं न जानासीति भावः।२७। ऋषिरुवाच
त्यन्तोत्पन्नदोषत्वात् भावात् कोपि परशरीरं याचेत।२८। दधीचिरुवाच। धर्मं वः श्रोतुकामे
न यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं त्यजंतं संत्यजाम्यहं।१ मे मया प्रत्युदाहृ
ताः प्रत्युक्ताः। मां त्यजंतं तद्यथा स्वकायां तंत्रात्मानं देहं युष्मदर्थे कथं न त्यजामि।२९। योऽ
ध्रुवेणात्मना नाथा न धर्मं न यशः पुमान्। ईहेत भूतदयया स शोच्यः स्थावरैरपि। अ
ध्रुवेणात्मना देहेन तदेनाथाः। स स्थावरैरपि वृक्षैरपि शोच्यः स्यात्।३०। एतावानव्ययो धर्मः

तुल्पश्लोकेरूपाप्तितः।यो नूतशोकदर्षाभ्यां आत्मारोञतिहृष्यति।९नूतानांशोकेनशोच
ति।हर्षेणाहृष्यति।एतावानेव आध्ययो धर्मः।८।।अहो दैन्य महोकष्टं पारक्यैः क्षणभंगुरैः
यन्नोपकुर्यादस्वार्थैः मर्त्यः स्वज्ञातिविग्रहैः।१०पारक्यैः श्वश्टगालादिभक्षैः।अस्वार्थैत्आ।।
त्मापयोगश्च न्यैः।स्वविक्तद्दारादिभिर्नोपकुर्यादितियत्।८।।श्रीशुकउवाच।।एवं कृतव्यव
सितो दध्याङाथर्वणस्तनुं।परेभगवति ब्रह्मण्यात्मानं सन्नयन् जहौ।११कृतंव्यवसितं
निश्चयो येन अक्षात्मानं स्रोत्रज्ञं मनं नयन् पक्कीऊर्वेन् तन्तुं जहो।८।।जितास्तासुमनोबुद्धितत्व षटी. ९२
दृक्ध्वस्तबंधनः।आस्थितः परमं योगं न देहं बुबुधे गतं।१२जिह्वं तोह्रियादध्योधेन।तव

दृक्तत्वं पश्यतीति तथा।ध्वस्ता निगता निबंधना नियस्या।८।।अथेंद्रो वज्रमुद्यम्य निर्मि
तं विश्वकर्मणा।मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः।१३अथेंद्रः शोभनतरभुतेने
णान्वयः।मुनेः शक्तिभिरस्थिभिः निर्मितं उ।उत्सिक्तः आोक्र र्जितः।८।।वृतोदेवगणैः स
र्वैः गजेंद्रोपर्यशोभत।स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव।१४वृत्रमभ्यद्रवच्छत्रुमसु
रानीकयूथपैः पर्यस्तमोजसाराजन् क्रुद्धो रुद्र इवांतकं।१५असुरानीकानां यूथपैः पर्यस्तं
परिवृतं वृत्रं अभ्यद्रवत्।८।।ततः सुराणामसुरैः रणः परमदारुणः।त्रेतामुखेनर्मदायाम
भवत्प्रथमेन घा।१६दारुणः संग्रामः।प्रथमे चतुर्युगे त्रेतामुखस्य प्रारंभे।८।।रुद्रैर्व

स्तुभिरादित्यैरश्विभ्यां पितृवह्निभिः । मरुद्भिरृभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं ॥१७ दृष्ट्वा
वज्रधरं शक्रं रोचमानं स्वया श्रिया । नामृष्यन्नसुरा राजन् मृधे वृत्रपुरःसराः ॥१८ नामृष्य
न्नु नासहंता ॥ ॥ नमुचिः शंबरो नर्वो द्विमूर्द्धा ऋषभोऽसुरः । हयग्रीवः शंकुशिरा विप्रचित्ति
रयोमुखः ॥१९ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कटः । दैतेया दानवा यक्षा रक्षांसि च सहस्र
शः ॥२० सुमालिमालिप्रमुखाः कार्त्तस्वरपरिच्छदाः । प्रतिषिध्येन्द्रसेनाग्रं मृत्योरपि दुरासदं
॥२१ अभ्यर्द्दयन्नसंभ्रांताः सिंहनादेन दुर्मदाः । गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥२२ शू
लैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः । सर्वतोवाकिरन् शस्त्रैरस्त्रैश्च विबुधर्षभान् ॥२३

षटी. ९२

तघ्नीचक्रदंष्ट्रालोहकंटकशूलायुधैः ॥ ॥ न ते दृश्यंत संछन्नाः शरजालैः समंततः । पुंखा
नुपुंखपतितैः ज्योतींषीव नभोघनैः ॥२४ पुंखो मूलदेशः एकस्य मूलदेशमनु तत्संलग्नाः
परस्पराग्रे यथा भवति तथा । नभःस्थैर्ज्योतींषीवेत्यनेन तेषां तद्दर्शाभिः सूचिता ॥ ॥
न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् । छिन्नाः सिद्धपथे देवैः लघुहस्तैः सहस्रधा ॥
पशास्त्राणामस्त्राणां वर्षाणि तेषां ओघाः नासेदुः न प्रापुः । सिद्धपथे आकाशे दे
वैः छिन्नाः ॥ ॥ अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः । अभ्यवर्षन्सुरबलं चिच्छि
दुस्तांश्च पूर्ववत् ॥२६ क्षीणाः अस्त्राणां शस्त्राणां ओघाः समूहा येषां । गिरिशृंगैः द्रुमैः उप

लेः पाषाणेस्त्रा ॥८॥ तानस्थितान् स्वस्थितमतो निशाम्य राज्ञा सह प्रगेरथ्यन्त्रनाथाः ॥ द्रुमैर्दृष क्षिवि
विक्षा दिष्टं गैः अविहतांस्तत्र सुरेंद्रसैनिकान् ॥२४॥ इंद्रसैनिकान् अस्त्राणां शस्त्राणां चक्रैगैर्म
मूर्द्धैः अहतान् हतत्कृत्यान् स्वस्थितमतस्तु खितः द्रुमादि निश्चयं विहतान् देवान् दृष्ट्वा शुवाम
हत्रोनाथो येषां ते तत्र सुतलीनाबद्धन्तुः ॥८॥ सर्वैः प्रयामाह्यस्त्र वज्रविमोघास्ततास्ततादेवग
णं ॥६॥ दैत्यैः ॥ हत्वा अनुकूलेषु यथा महत्स्तु तत्रैः दैः प्रयुक्ता रुश्याती हृहृतवावः ॥२८॥ हीणात्र्यस्त्र
णां वर्जघा येषां ते हतनाहता ऊतनऊतः प्रयुक्ताः मोघा वज्रबुः ॥ हतोऽन्नुकूलो येषां ते भमद
ऋु ३अ सतीत्र कल्याणा हृत्ताप रुपावावो यथा स्तोप कर्योनन्नवंतितद्धृतन् ॥८॥ तेस्वप्रया षटी. ९३

मं वितथं निरीक्ष्य दूरावपक्काद्तत्कुद्धदर्पाः। पत्तेला यनाया जिमुखे विसृज्य पतिं मनस्तेद स्थुरा
नमारात् ॥२९॥ हतो युद्धे दर्पो येषां ते आर्द्रैः परैर्गृहीतः सारो धैर्यं येषां ते ॥८॥ हत्रो सुरांस्तानन्तुग
न्मनस्वी प्रधावतः प्रेक्ष्य बलाबएततापलायितं प्रेक्ष्य बलं चमत्कृंसयेन तीव्रेण विदस्पवीर
॥३०॥ अतिप्रसिद्धान पिदैत्यान् प्रधावतः पलायमानान् प्रेक्ष्ये आदावेव तीव्रेण मयेनप
लायितं मनसं पयकुलं तत्र प्रेक्ष्य एतवक्ष्यमाणं ववचः आबभाषे। तदेव विशिनष्टि। कालइति।
कालोपपन्नां रुचिरां मनस्विनां उवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्तेन सुपेक्ष्यलो मनमध
नर्वन् शांसतो मेस्तु णुधां ॥३१॥ हे प्रयहे अनर्वन् कालोपपन्नां अव सरो चितां मनस्विनां रुचिर

रं मे वाचं शृणुध्वं ॥७॥ वृत्र उवाच ॥ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता
। लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं ।३२। यतो मृत्योः द्व्यय शःलो
कः स्वर्गश्च यदि स्यात् अथ तर्हि इमं मृत्युं युक्तं समीचीनं प्राप्तं को नाम न वृणीत ।७। द्वौ सं
मतौ विद्ध मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः कलेवरं योगरतो विजह्यात् यदग्रणी
वीरशये ऽनिवृत्तः ॥३३॥ ब्रह्मसंधारणया कलेवरं जह्यादिति यत् । स एको मृत्युः । वीरशये र
णभूमौ ऽनिवृत्तः पराङ्मुखः सन् जह्यात् कलेवरं स च द्वितीयः तौ द्वौ विद्ध शास्त्रसंमतौ षटी · ५४
मृत्यू । तथा च स्मृतिः ॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राड्योगयुक्तश्च रणे

चाभिमुखो हतः ॥७॥ जातस्य पुंसः प्रलयो ध्रुवस्य पलायमानस्य च युध्यतो वै । तस्माद्वह्निर्नप
लायितव्यं यो ऽध्वयमेवात्र हरेः समीपि । धध्यत्रस्तच प्रधाना देवाः यत्र धर्मः तत्र हरेः संनिधानं
मत्वा न पलायितव्यं ।७॥ ॥ इति श्रीभागवते महापुराणे षस्कंधे वृत्रासुरवधे दशमो ऽध्याय
ः ॥ ॥७॥ ॥ एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा । भक्तिज्ञानबलोदर्काः श्रियो वाचो ऽनु
वर्णिताः ॥७॥ श्रीशुक उवाच ॥ त एवं शंसतो धर्म्यं वचः पत्युरचेतसः । नैवागृह्णन् नववध्वाः
निर्धनस्येव योषितः ॥१॥ शंसतः कथयतः पत्युर्वचः धर्म्यमपि नैवागृह्णन् । यतः अचेतस
ः स्वस्थचित्तेभ्यः अयं संभवंतीति वचनात् ।७। विशीर्यमाणां पृतनां आसुरीमसुरर्षभः

।कालानुकूले त्रिदशैः काल्यमानामनाथवत् ॥ २ कालानुकूले कालानुवर्तिभिः काल्य-
प्पन मानां विद्राव्यमानां ॥ बा ॥ दृष्ट्वा तं संक्रुद्धः स्वरत्रातुरमर्षितः । तान्निवार्योजसा राजन् निर्भर्त्स्ये-
दमुवाच ह ॥ ३ अमर्षितः अमर्षमानः । तान् त्रिदशान् निवार्य निर्भर्त्स्य इदं वक्ष्यमाणमुवाच ॥ त-
वृत्र उवाच ४ दाह तान् प्रति किं वेति ॥ बा ॥ किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः । न हि भीतवधः श्लाघ्यो
न स्वर्ग्यः शूरमानिनां ॥ ४ मातुरुच्चरितैः पुरीषप्रायैः प्रथमांतपाठे देवानां संबोधनं । पृष्ट-
तो हतैर्दैत्यैः किं न किंचित् । न यशो नापि धर्मः । तदेवाह ॥ बा ॥ यदि वः प्रधने श्रद्धा सारं वा क्षु- षटी. ९५
ल्लका हृदि । अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ प्रधने संग्रामे यदि श्रद्धा । हे क्षुल्लकाः

हे क्षुद्रेच्छाः सारं धैर्यं चेत् तर्हि मात्रं क्षणमात्रं मे अग्रे तिष्ठत । न चेदिहलोकभोगे स्पृहा ॥ बा ॥ एवं सु-
रगणान् क्रुद्धो भीषयन् वपुषा रिपून् । व्यनदत् सुमहाप्राणो येन लोका वितत्रसुः । ६ सुरगणा-
न् रिपून् महान् प्राणो बलं यस्य येन नादेन सर्वे लोकाः वितत्रसुः । त्रासं प्रापुः ॥ बा ॥ तेन देव-
गणाः सर्वे वृत्रविस्फोटितेन वै । निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ॥ ७ वृत्रस्य
विस्फोटितेन सिंहनादेन ॥ बा ॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ।
गां कंपयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथा गजः ॥ ८ नालं नलानां वनं । उद्य-
तो मदो यस्य उद्यतं शूलं त्रिशूलं येन । यूथपतिर्गजो यथा नालं वनं मर्दयति तथा ॥ बा ॥

विलोक्य तं वज्रधरो त्यमर्षितः स्वशात्रवे सिद्धवते महागदां। चिक्षेप तां मा पतंती सुतः स्वदंज
ग्राहवामेन करेण लीलया। ९ स इंद्रशत्रुः कुपितो नृशंतयाम हेंद्रवाहं गदयोय विक्रमः
।जघान कुंभस्थलमुन्नतं दमन् मृधे तत्कर्म सर्वे समपूजयन्नृप। १० ऐरावतो हत्वगदाभिमृष्टो वि
घूर्णितो दिक्कुलिशाहतो यथा। अपासरेत् सन्निभुखः सदैत्यो मुं वमन् रक्तमपत्रधनुर्दशा
र्त्तः ॥११ सर्वधन्तुः प्रमाणां दशांश्च पासरत ।ग॥ न सन्नवाहाय विषमचेतसे प्रायुंक्त नृयः स
गदां महात्मा गजोः ऋतस्पंदकराग्निमर्शी वीतव्यथो गतक्लः खो वतस्थौ। १२ स ग्रोवाहाय। षटी·
स्या। तस्मै इंद्राय गदां न प्रायुंक्त। अद्यतस्पंदी अमृतस्रावी यः करः तेनाग्निमर्शः स्पर्शः तेन ९६

वीतव्यथो गतक्लः खो योगजः तस्योपरि अवतस्थौ ।ग। स तं नृपेंद्रा द्रवकाम्यया रिपुं वज्रा
युधं भ्रातृहणं विलोक्य। स्मरंश्च तत्कर्म नृशंसमंदः शोकेन मोहेन दमज्जगाद। १३ हे नृपें
द्र सत्वं तु आद्रवकाम्यया वस्थितं भ्रातृहणं भ्रातरं विश्वरूपं हतवंतं नृशंसं क्रूरकर्मकारि
णं इंद्रं विलोक्य दमन् जगाद ।ग। श्लोकवाच॥ दिष्ट्या भवानेष मम वस्थितो रिपुर्यो ब्रह्महा गु
रुहा भ्रातृहा च। दिष्ट्या नृणोऽघाद्य समंतमवया मह्युल्लतिभिन्नदृषद्धदा विरात्। १४ पापं तस्य
कर्म स्मारयन्नेयो ब्रह्महा ब्राह्मणं हतवान विशेषतः स्वगुरुं मम च भ्रातरं। भवान् अध
मे अग्रतः समवस्थितः। एतद्दिष्ट्या सद्गं जातं। दिष्ट्येत्य व्यय मानं दार्थेद्देऽस्य सत्तमममम।

त्रिशूलेन निर्भिन्नं दृष्ट्वा तु त्वं कथितं त्वदर्थं यस्मात् तेन त्वया निमित्तभूतेन अघ अचिरादेव
प्राप्तः श्रवणाद्दस्यापांगोयो नो यजस्यात्म विदो द्विजाते घोरपापस्य यदीक्षितं तस्य विश्वस्य खंड
फेन शिरांसि दृष्ट्वा तपस्विनारिवाकरुणः स्वर्गकामः ॥१५॥ स्वर्गकामो यो भवान् अदृष्ट्वा
त् विच्छेदात् स्वर्गकामो यास्त्रिकः पशोरिव ॥ ॥ श्रीपार्वत्युवाच कीर्त्तिमिरुस्फितं त्वां स्वकर्मणा
उरुषादेश्वगर्दहस्तच्छेदनम शूलविभिन्नदेहमस्पृष्टवक्त्रिं यमदंडदृष्टः ॥१६॥ तं त्वां अस्पृष्ट
वक्त्रिं अदग्धदेहं दृष्ट्वा समदंडजन्तुं ययौ ॥ अन्ये च ये ये दृष्ट्वा तं समज्ञाह्वय दृष्टघनाघ्नाः प्रद
रंति महत्त्वं ॥ तैर्भूतनाथानुगगणान् निशाततत्रिशूलनिर्भिन्नगणैर्यजामि ॥१७॥ अन्ये पिये
तै१

ष॰रा॰
९५

अज्ञाः हृद्वा वांछ्यां संस्तु ॥ उद्यतास्त्राः संतः महत्त्वं प्रदहंति ॥ तैः रुद्रगणान् यजामि कथं त्व
तैः निशाततीक्ष्णां यत्नम त्रिशूलं तेन निर्भिन्नो गणो येषां तैः ॥१८॥ अथौ द्वरेमे कुलिशेन वीर
हर्त्तापि मध्ये च शिरो यदीह ॥ तत्राहणोनुत बलिं विधाय मनस्विनां पादरजः प्रपस्ये ॥१९॥
अथो अथवा हेद्दरेत्वो इंद्र यदि भवानेव कुलिशेन वज्रेण मम शिरो हर्त्ता हरिष्यसि ॥ तत्र
तथापि तिथ्य हणो विभुक्त कर्मबंधः सन् तु तेभ्यो बलिं देहेन विधाय मनस्विनां पादरज
ः प्रपस्ये ॥ धीराणां पदं प्राप्स्यामि ॥ जीवितादपि हृत्स्वरेवममापि येतदस्माद्वायेनादृ ॥ सुरे
शेति ॥२०॥ सुरेशा कस्मान्न हितो षिवज्रं पुरः स्थितेवैरिणि मय्यमोघं ॥ मा संशयिष्टाः निगदं च व

त्रंस्मान्निः प्फलं त्स्पणार्थं वयाञ्चा ॥१९॥ नन्दिनोषि नत्स्निप सिगदेव निष्फलो यास्यसी ति सं
शायं माकाषीः त्स्पणात्त्र अर्थप्रयोजनं यस्माः माया ञ्चा यथा निष्फला तथा न स्यात् ॥७॥
नन्वेष वज्रस्त्व शाक्रतेजसा हरेर्दधीचस्तपसा च तेजितः । तेनैव शत्रुं जहि विष्णुयंत्रितो
यतो हरिः श्रीविजयो गुणास्ततः ॥२०॥ अमोघं ते त्व वदन्तं प्रोत्साहयति तेजितः तीक्ष्णी
कृतः । शत्रुं मां जहि विष्णुनायंत्रितः प्रेरितः ॥७॥ अहं समाधाय मनो यथाह संकर्षणस्त
च्चरणारविंदे । त्वद्वज्ररंहो लुलितग्राम्यपाशो गतिं मुनेर्याम्य पविद्धलोकः ॥२१॥ संकर्षणे षटी. ९८
मत्पति र्यथाह तथा तदीयचरणारविंदे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि

तव वज्ररंहसा लुलितः । छिन्नो ग्राम्यपाशो विषयरूपो गलस्तरणो यस्य । अपविद्ध लोकः त्यक्त
देहः । तर्हि भगवान् संकर्षणः स्वकृत्याय मह्यं स्वर्गादिसंपदो दास्यसीत्यपि मा शंकिष्ठाः इ
त्याह । पुंसामिति ॥७॥ पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां । नराति
यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयास ॥२२॥ स्वर्गे भूमौ रसातले च याः संपद
स्ताः किल निश्चितं मम स्वामी न राति न ददाति । यत्र हेतुः यत्तस्या सु द्वेषादयो भवंति । तर्हि
स्वभक्तस्य किं विधत्ते तदाह त्रैवर्गिकेति ॥७॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते
पुरुषस्य शक्र । ततो नुमेयो भगवत्प्रसादो यो दुर्लभो किंचनगोचरेतरैः ॥२३॥ ततः आय

त्रैवर्गिको धर्मार्थकामविषयो यः आयासः तस्य विघातं विधत्ते ।

सौपरमादेवानुमेयः।नचैश्वर्यादिना।अतस्तत्कृतभगवत्प्रसादाभावात्तवपदोनवि
ष्यामीतिभावः।इतिइंद्रायस्वाभिप्रायंनिवेद्यभगवंतंप्रार्थयति।अहमिति।।३।।अहंहरेत
वपादैकमूलदासानुदासोभवितास्मिभूयः।मनःस्मरेतासुपतेर्गुणानांगृणीतवाक्क
र्मकरोतुकायः।२४तवपादावेवएकंमूलमाश्रयोयेषांतेषांदासानामनुदासःसन्भूयोभवि
तास्मि।नविष्यामि।नवेयं।असुपतेःप्राणनाथस्यतवगुणान्ममनःअनुस्मरतु।वागेव
तंअनुकीर्तयतु।कायस्तवैवकर्मकरोतु।ननुकिंदास्येन।उत्स्वंमहाफलानिदास्यामीतित
त्राह।नेनाकेति।।३।।ननाकपृष्ठंनचपारमेष्ठ्यंनसार्वभौमंनरसाधिपत्यंनयोगसिद्धीरपुन

ष.टी.
९९

र्भवंवासमंजसत्वाविरहय्यकांक्षे।२५नाकपृष्ठंध्रुवपदं।ब्रह्मलोकंवा।हेसमंजसनि
खिलसौभाग्यनिधेत्वांविरहय्यपृथक्कृत्यनकांक्षे।तर्हिकिमिछसितदाह।अजातेति
।।३।।अजातपक्षाइवमातरंखगाःस्तन्यंयथावत्सतराःक्षुधार्ताः।प्रियंप्रियेवव्युषि
तंविषण्णामनोरविंदाक्षदिदृक्षतेत्वां।२६अजातपक्षाःखगाःघूकादिभिःपीडितायथा
मातरमिछंति।दाम्नाबद्धाबालवत्सायथास्तन्यमिछंति।यथाचव्युषितंप्रवा
संगतंप्रियंकुलवती।स्त्रियःकामेनविषण्णायथाप्रियमिछंति।तथाममनःतापत्रयपीडि
तंकर्मभिर्बद्धंकामादिभिर्वैषम्यंदिदृक्षतेत्यर्थः।।३।।ममोत्तमश्लोकजनेषुसख्यंसंसा

रचक्रेभ्रमतःस्वकर्मभिः।त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्यननाथभूयात्।२
७उत्तमश्लोकस्यतवजनेष्वनक्रेधेवमस्यंभूयात्त्वन्मायपदेहादिष्वासक्तस्यभूयोपितेषा
सक्तिर्माभूत्।ब।। ।।इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेवृत्रासुरइंद्रसंवादेएकादशो
ऽध्यायः।। ।।ब।। ।।द्वादशेतिविषण्णेनस्वयमुत्सृष्टमायुधे।महेंद्रेणमहायुद्धेवृत्रस्यव
धईर्यते।ब।श्रीशुकउवाच।।एवंजिहासुर्नृपदेहमाजौमृत्युंवरंविजयान्मन्यमानः। षटी·
शूलंप्रगृह्याभ्यद्रवत्सुरेंद्रंयथामहापुरुषंकैटभोप्सु।१।महापुरुषंश्रीविष्णुंयथाप्सुप्रल १००
श्रि.. योदके।ब।।ततोयुगांताग्निकठोरजिह्वमाविध्यशूलंतरसासुरेंद्रः।क्षिप्त्वामहेंद्रायविनद्य

वीरोहतोसिपापेतिरुषाजगाद।२।युगांताग्निवत्कठोराजिह्वाशिखायस्यातत्शूलमाविध्य
भ्रामयित्वा।ब।।खआपतत्तद्विचलद्ग्रहोल्कावत्।निरीक्ष्यदुःप्रेक्ष्यमजातविक्लवः।वज्रे
णवज्रीशतपर्वणाछिनत्भुजंचतस्योरगराजभोगं।३।ततखेअंतरिक्षेआपतत्आग
च्छत्विचलत्परिभ्रमत्ग्रहश्चउल्काचग्रहोल्केतद्वत्दुःप्रेक्ष्यंशतंपर्वाणियस्यतेनाउर
गराजोवासुकिःतस्यभोगोदेहःतदाकारंभुजंवज्रंछिनत्।ब।।छिन्नैकबाहुःपरि
घेणवृत्रःसंरब्धआसाद्यगृहीतवज्रं।हनौतताडेंद्रमथामरेभंवज्रंचहस्तान्न्यपतन्मघो
नः।४।हनौकपोलप्रांते।अमरेभंऐरावतं।ब।।वृत्रस्यकर्मातिमहाद्भुतंततसुरासुराश्चा

रणसिद्धसंघाः ।अथ पूजयंस्तत्सुकृतं समंकर्ट निरीक्ष्यपदादेति विबुद्धशेषं ।पदं द्रोन वज्रं जग
द्विप्लवल क्रितं तत्युतंस्तद्धस्तादरिमं निधीभूतनः ।नमाद्दृष्ट्वो दृश्यानवज्ञो जद्दिस्वेच्छानुं नवि
षादकालः ।दृष्टपुस्तसतां कृत्र विदानता यिनां जयः सदैकतत्रनवे पराजयः ।विनैकमुल्प ।
निलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनं ।४ सदाजयो नैव ।किं तु कृत्र चिकृपः कृत्र ।
चित्पराजयः ।यद्वा ।कृत्र चिदपि पुष्पुस्तसतां सदाजयो नैव किं त्वेकदैव ।कदाचिदेवेत्यर्थः ॥
लोकाः सपालाय स्योमे श्वसंति विवशा वशो ।द्विजा इव शिचाबद्धाः सकाल इह कारणं ।६प षटी. २०२
राधीनतामेवाह ।यस्य वशे स्थिताः स्वयं विवशाः सन्तः श्वसन्ति चेष्टन्ते ।द्विजाः पक्षिणः शि

चाजाले तन्त्र्य तएव इह कारणं कालः ॥ईजः सदो बलं प्राणत्रुत्तं मृत्युरेव च ।तमज्ञाय ।
जानाहेतुमात्मानं मन्यते जडः ।७ भगवान् इच्छयादौ कारणं ।ईजस्यादिस्वरूपं तदेहेतुमज्ञाय
स्वज्ञावाच्या त्मानं जडस्संतं हेतुं मन्यते ॥यथा दारुमयी योषित् यथा यन्त्रमयो मृगः ए
वं भूतानि मघवन् ईशतन्त्राणि विद्धि भो ।१० नतु स्वारंभकत्र धानपुरुषादितन्त्राणीति पु
नं कथं कालतन्त्राणि ।तत्राह ।पुरुषइति ॥पुरुषः प्रकृतिर्व्यक्तमात्मभूतेन्द्रियाशयाः
।शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात् ।११ व्यक्तं महत्तत्त्वं आत्मा अहंकारः नतु स्वक
र्मधाराजीव एव स्रष्ट्यादिहेतुरिति मीमांसका मन्यन्ते तत्राह ॥अविद्वानेवमात्मानं मन्य

तेंनीशमीश्वरं।कुलैःस्वजतिस्कृला नियमतेतानितैःस्वयं।१२ एवमविद्वान्अनीशं एवंआत्मा
नं ईश्वरं स्वतंत्रं मन्यते।यदुक्तं स्वकर्मद्वाराङ्गीवएवस्वेच्छ्यादिहेतुरिति तत्राह।कुलैरिति।स्व
यं ईश्वरः।ननु त्वया पराजितस्य मम जयादिरं केवलास्ति।किमिति मां बलात् युद्धे प्रवर्त्ती
यसि तत्राह।आयुरिति।।८।।आयुःश्रीःकीर्तिरैश्वर्यं आशिषः पुरुषस्य या।नवं त्वेव हित
काले यथा तिष्ठो विपर्ययाः।१३ तत्काले जयादिकाले आयुरादयो भवंति।यथात्र तिष्ठै
रपि विपर्ययाः अकीर्त्यादयो न वं त्वेव।।८।।तस्मात्कीर्तियशसो जयापजययोरपि।सम
स्मात्सुखदुःखाभ्यां श्लुजीवितयोस्तथा।१४ यस्मादेवं सर्वईश्वराधीनं तस्मात्समत्या

त्मा हर्षविषादहीनो भवेत्।समदृष्ट्यानुपायमाद्य सत्वमिति।।८।।सर्वं खल्वमहतिपस्त्रतेर्ता
त्मनोगुणाः।तत्रमात्तिणमात्मानं योवेदन सबध्यते।१५ हर्षविषादादिभिः नबध्यते।हर्षवि
षादनिवृत्तौ नवाह एवगुरुरित्याह।परस्पेति।।८।।परस्परं मां निर्जितं शाक्रुष्ट्वा युद्धतुजं
धें यद्दमानं यथा शक्तिं न तथा न जितरोषया।।१६ हस्तं छित्वं आयुधं स्वयस्य।।८।।प्राणग्ल अनिधनत्वं द्यू तरूपकेणोप संहरति।।४
होयं समरः इवस्तो वाहनासनाः।अत्र न ज्ञायते जयोऽपजयो वाथ पराजयः।१७ अनिधनत्वं
तद्रूपकेणोपसंहरति।प्राणाएवग्लहः पणो यस्मिन् इषवएवअक्षाः वाहनान्येव नतत्सा
ल्यमाना निफलका नियस्मिन्।।८।।श्रीशुकउवाच।।इंद्रो वृत्रवचः श्रुत्वा गतालीकमपू

जयत्।गृहीतवज्रःप्रहसन्स्तमाहगतविस्मयः।।१८गतालीकंनिःकपटंगतविस्मयस्त्वा
गतविस्मयोवा।।छ।।इंद्रउवाच।।अहोदानवसिद्धोसियस्यतेमतिरीदृशी।भक्तःसर्वात्मना
त्मानंसुहृदंजगदीश्वरं।।१९भक्तःसेवितवानसि।।छ।।भवानतार्षीन्मायांवैवैष्णवींजनमो
हिनीं।यद्विहायासुरंभावंमहापुरुषतांगतः।।२०खल्विदंमहदाश्चर्यंयद्रजःप्रकृतेस्तव।
वासुदेवेभगवतिसत्वात्मनिदृढामतिः।।२१यस्यभक्तिर्भगवतिहरौनिःश्रेयसेश्वरे।विक्री
डतोमृतांभोधौकिंक्षुद्रैःखातकोदकैः।।२२तस्यतवखातकोदकैःगर्तादिजलोपमैःस्वर्गा
दिभिःकिंनकिंचिदित्यर्थः।।छ।।श्रीशुकउ।।इतिब्रुवाणावन्योन्यंधर्मजिज्ञासयानृपायु

युधातेमहावीर्याविंद्रवृत्रौयुधांपती।।२३युधांसंग्रामाणांसंग्रामसाधनानांमध्येपतीमु
ख्यौ।।छ।।आविध्यपरिघंवृत्रःप्राहिणोद्वरयेनदन्।चिच्छेदयुगपद्देवोवज्रेणशतपर्वणा।।२४यु
गपत्एककालंद्वितीयंभुजंपरिघंच।।छ।।दोर्भ्यामुत्कृत्तमूलाभ्यांबभौरक्तस्रवोसुरः।छिन्न
पक्षोयथागोत्रःखाद्भ्रष्टोवज्रिणाहतः।।२५उत्कृत्तंमूलंययोःताभ्यांरक्तंश्रवतीतियथागो
त्रःपर्वतःवज्रेणछिन्नपक्षः।।छ।।कृत्वाधरांहनुंभूमौदैत्योदिव्युत्तरांहनुं।नभोगंभीरवक्त्रेण
लेलिहोल्बणजिह्वया।।२६कृत्वाधरायामित्यादेजग्रासेतिद्वितीयेनान्वयः।नभोवद्गंभीरे
णवक्त्रेणलेलिहःसर्पःतद्वदुल्बणयाजिह्वया।।छ।।दंष्ट्राभिःकालकल्पाभिःग्रसन्निवज

गजं यथा ॥ अतिमात्रमहाकायः आक्षिपंस्तरसा गिरीन् ॥२७॥ कालकल्पाभिः कालकल्पाभिर्दं
ष्ट्राभिः गिरीश्चालयन् ॥छ॥ गिरिराट्पादचारीव पद्भ्यां निर्जरयन्महीं । जग्रास समासाद्य व
ज्रिणं सहवाहनं ॥२८॥ पद्भ्यां महीं निर्जरयन्नुद्धर्षयन्निव ॥छ॥ महाप्राणो महावीर्यो महास
र्प इव द्विपां ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः
॥२९॥ न ममारोदरस्थोपि भगवान्पाकशासनः ॥ महापुरुषसंनद्धो न प्राप्तो मोहमेव च ॥३०॥ मह षटी.
प्राणो महाबलः महापुरुषेण श्रीनारायणकवचरूपेण संनद्धः दंशितः ॥छ॥ भित्त्वा वज्रेण १०४
तत्कुक्षिं निःक्रम्य बलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोः गिरिशृंगमिवौजसा ॥३१॥ उच्चकर्त विछे

द ॥छ॥ वज्रस्तु तत्कंधरमाशुवेगः कृन्तन्समंतात्परिवर्तमानः ॥ न्यपातयत्तावदहर्गणेन यो
ज्योतिषामयने वार्त्रहत्ये ॥३२॥ तस्य वृत्रस्य कंधरां ग्रीवां आशुवेगः अतिवेगवान् ज्योति
षां सूर्यादीनां अयने दक्षिणोत्तरगतिरूपे संवत्सरे यो हर्गणः षष्ठ्युत्तरशतत्रयात्मकः ता
वता हर्गणेन ॥ वार्त्रहत्ये वृत्रहत्यायोग्ये काले न्यपातयत् ॥ यद्वा स्वार्थे तद्धितः ॥ वृत्रहत्यायां
वृत्रहननार्थं परिवर्तमानः इत्यर्थः ॥छ॥ तदा च खे दुंदुभयो विनेदुः गंधर्वसिद्धाः समहर्षिसंघाः
वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ॥३३॥ वार्त्रघ्नलिंगैः मंत्रैः ॥ वृत्रहंतुर्वीर्य
प्रकाशकैः ॥ तथा च श्रुतिः ॥ वार्त्रहत्याय शवसे पृतनाषाह्याय चेत्याद्यैः ॥ तमिंद्रं अभिष्टुवा

ना॥ अस्तिष्टुवंतः॥७॥ वृत्रस्य देहान्निःक्रांतमात्मज्योतिररिंदम। पश्यतां सर्वलोकानामलोकंस
मपद्यत॥३५॥ अलोकं लोकातीतं भगवंतं॥७॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रा
सुरवधो नाम द्वादशोऽध्यायः॥१२॥ ॥त्रयोदशे तु वृत्राख्यब्रह्महत्या महाभयात्। चिरं नष्टो वि
तः शक्रो विष्णुना तितिनिष्कृष्यते॥ श्रीशुक उवाच॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद
॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः॥१॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं। प्र
तिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः॥२॥ अनिर्वृतं शक्रमदृष्ट्वा स्वयमेव स्वधिष्ण्यानि षटी· १०५
प्रतिजग्मुः॥७॥ राजोवाच॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने। येनासन्सुखिनो दे

वाः हरेर्दुःखं कुतो भवत्॥३॥ तस्य हरेः इंद्रस्य दुःखहेतु वृत्रवधं प्रस्तावकथामाह॥७॥ श्रीशुक
उवाच॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः। तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात्
॥४॥ अर्थयत् प्रार्थयत्। बृहद्वधात् ब्राह्मणवधाद्भीतः सन्॥७॥ इंद्र उवाच॥ स्त्रीभूजलद्रुमै
रेनो विश्वरूपवधोद्भवं। विभक्तमनुगृह्णद्भिः वृत्रहत्यां क्व मार्ज्म्यहं॥५॥ एनः पापं विभक्तं वि
श्वरूपहत्याजनितं क्व मार्ज्मि क्व शोधयामि॥७॥ श्रीशुक॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिद
मब्रुवन्। याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः॥६॥ हयमेधेन पुरुषं परमात्मानमीश्वरं।आ
ध्य नारायणं देवं मोक्ष्यसेऽपि जगद्वधात्॥७॥ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान्॥

श्वादः पुल्कसको वापि शुध्येरन् यस्य कीर्तनात् ।८ तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्मा
भिरनुष्ठितेन । हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ।९ श्रीशुक उवाच ॥ ए
वं संचोदितो विप्रैः मरुत्वाननहनद्रिपुं । ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं ।१० वृषा
कपिं इंद्रं । वृषाकं पुण्यं तत्पिबति न मुंचतीति वृषाकपिस्तं ।ठ॥ तयेंद्रः स्मासहत्तापं निर्वृ
तिर्नामुमाविशत् । ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ।११ तया देवादिभिः कारि
तया । स्मेत्यवधारणे । इंद्र एव तापम[illegible] न त्वन्यः प्रेरयिता । अमुं इंद्रं निर्वृतिर्नाविशत् ।
न तु धैर्यादिगुणयुक्तस्य इंद्रस्य कुतो निर्वृतिः तत्राह ह्रीमंतमिति ।ठ। ददर्श तामभिधावंतीं

ह्रीमंतं लज्जायायुक्तं वाच्यतां निंद्यतां

आयांतीं पाकशासनः । वेपमानांगीं महाराज यक्ष्मग्रस्तामसृक्पटां ।१२ यक्ष्मग्रस्तां क्षयरोग
व्याप्तां । असृक्पटां रुधिराक्तवस्त्रां । वेपमानां । कुतः । विभ्रोऽर्थे जनमात्रेण आत्मनः नाशमा
शंकमानां ।ठ॥ विकीर्य पलितान्केशान् तिष्ठतिष्ठेति भाषतीं । मीनगंध्यसुगंधेन कुर्व
तीं मार्गदूषणं ।१३ मीनस्येव गंधो यस्य स मीनगंधिः स चासावसुश्च श्वासवायुः तेन गं
हि· धेन मार्गदूषणं कुर्वतीं ।ठ॥ नभो गतो दिशः सर्वाः सहस्राक्षो विशांपते । प्रागुदीचीं दिशं
तूर्णं प्रविष्टो नृप मानसं ।१४ प्रागुदीचीं दिशं ईशानकोणं गतः सन् तूर्णं मानसं सरः प्रवि
ष्टः । तत्रापि कमलनालतंतुं प्रविष्टः ।ठ॥ स आवसत्पुष्करनालतंतूनलब्धभोगो यदि

दाग्निहूतः। वर्षाणि माद्यमलक्षितौ तः मर्वितयद्ब्रह्मवधादिमोक्षं॥ २ एतावत् त्रिनाकेन
घुषः शशास। विद्यातपोयोगबलानुभावः। सम्पं पदैश्वर्यमदांधबुद्धिर्नीतो तिरश्चां गतिमि
द्रपत्न्या॥ २६ त्रिनाकं तत्र कं दुःखं यस्मिन् त्रिनि नाकः भूण एप लोकः त्रितीयं नाकः स्वर्गः। ननुम
नुष्यस्य कृतः स्वर्गराज्यं। तत्राह विद्यातपोयोगबलान्यां अनुभावो योग्यता यस्य। इंद्रपदै
श्वर्यात् यो मदस्तेन नांधा बुद्धिर्यस्य। स तु इंद्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं प्रापितः। त्रश्च
सुपायं नहुषः किल कदाचित् इंद्राणीं दृष्ट्वा कामातो वाच। इंद्रस्थाने वर्तेऽहं अतस्त्वं मां भजेति। त
या चावेदितं तदा तो वृहस्पतिः तां उवाच। ब्राह्मणवाह्य शिबिकामारुह्यागतं त्वां भजिष्यामी

षटी·
१०७

ति श्रुत्वा तया च तथोक्तो नहुषः अगस्त्यादीन् शिबिकां वाहयामास। ततः कामांधः द्रुतमम
त्यंतं जानंतीति। सोते चन्द्रभेण शीघ्रं सर्प सर्प इत्यगस्त्यं पदा पस्पर्श। तेन च कुपितेन सर्पो
भवेति वशाप्तो महासर्पोऽगस्त्योरुक्तः॥ ॥ ततो हरिर्ब्रह्मगिरोपहूतः इतं तं नरध्यानतिवा -रू
रिताघपापस्तु दिवं तयाह। तौ जातं नाह्य पहृ दवितं विष्णुपत्न्या॥ ११ ततः इंद्रः स्वर्गं गतः
पूर्वोः। कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येन उपहूतः सन् रुतं जनरः सत्यपालको हरि स्त
स्य ध्यानेनै निवारितमघं यस्याः प्राग पितु पापो ब्रह्मवधः तमिंद्रं नाभ्यभूत् अक्तः दिग्देवता
तया प्रागुदीच्यां दिशि स्थितेन श्रीरुद्रेण च वितं रक्षितं संतं॥ १७॥ तं च ब्रह्मर्षयोऽभ्यपद्य

मेधेन भारत। यथावद्दीक्षयां चक्रुः पुरुषाराधनेन ह॥१८॥ पुरुषस्य हरेः आराधनं यस्मिन् तेन।
॥टी॥ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि। अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः॥१९॥ स-
र्वदेवमयश्चात्मा अन्तर्यामी यस्य। तस्मिन्। वेदमयात्मनीति वा पाठः। ब्रह्मवादिभिः वितते। अनु-
ष्ठिते। महेन्द्रेण इज्यमाने पुरुषे सति॥टी॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप। नीतस्तेनैव
शून्याय नीहार इव भानुना॥२०॥ तेनैव पुरुषेणैव शून्याय नीतः॥टी॥ स वाजिमेधेन यथोदि- षटी॰ १०८
तेन वितायमानेन मरीचिमिश्रैः। इष्ट्वाधियज्ञं पुरुषं पुराणं इन्द्रो महानास विधूतपापः॥२१॥ अ-
धिष्ठाता यज्ञा येन तं। पा॰ग॰ दिविधा ३ माख्यानं स्तौति॥टी॥ आख्यानमेतच्छृणुयाच्च भक्त्या प्र-

क्षालनं तीर्थपदानुकीर्तनं। भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः॥२२
प्रक्षाल्यते अनेनेति प्रक्षालनं। तीर्थपदस्य विष्णोः अनुकीर्तनं यस्मिन्। भक्तजनानामनुव-
र्णनं यस्मिन्। महेन्द्रस्य मोक्षो यस्मिन्। मरुत्वतो विशेषेण जयो यस्मिन्॥टी॥ पठेयुराख्या-
नमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियं। धन्यं यशस्यं निखिलाघमोचनं रिपुंज-
यं स्वस्त्ययनं तथायुषं॥२३॥ इन्द्रियं इन्द्रियाणां पाटवकरं। इन्द्रसंबंधीति वा इन्द्रियं आख्यानं।
आयुष्यं स्वायुनर्नमरतीति तस्मिन्नेव देहान्ते हरिलोकप्राप्तिर्भवतीति भावः॥टी॥ ॥इति
श्रीभागवते महापुराणे षष्ठस्कंधे इन्द्रविजये पुरुषयजनो नाम त्रयोदशोऽध्यायः॥ ॥

फण॥ ॥वृत्रस्यज्ञानभक्त्यादिश्रुत्वा हृष्टः परीक्षिता। हेतुमाह चतुर्भिस्तत्पूर्वजन्मचरितं किल
॥ चतुर्दशे तु महसा सूत्रबुद्धेः स्तुते हृते। चित्रकेतोरतिस्नेहात्पुत्रशोको निरूप्यते ॥१॥ रा
जोवाच ॥ रजस्तमस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः। नारायणे भगवति कथमासीद्दृढा मति
ः॥१॥ रजस्तमश्च स्वभावो यस्य। दृढा फलाभिसंधिरहिता ॥१॥ देवानां शुद्धसत्वानां ऋषीणां
चामलात्मनां। भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥२॥ प्रायेण बाहुल्येन तस्के ईदृशं सर्वं प्र
पंचयति॥ रजोभिरिति त्रिभिः॥१॥ रजोभिः समसंख्याता पार्थिवैरिह जंतवः। तेषां ये केच ष·टी· १०८
नेहंते श्रेयो वै मनुजादयः॥३॥ पार्थिवैः रजोभिः परमाणुभिः समाः संख्याताः अनंता इत्यर्थः।

जंतवो जीवाः तेषां मध्ये ये केचन श्रेयो धर्ममीहंते कुर्वंति॥ प्रायो मुमुक्षवस्तेषां केच
नैव द्विजोत्तम। मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥४॥ मुच्येत दृढाद्विरागाद्विमुच्य
ते। सिध्यति आत्मतत्वं ज्ञानाति॥४॥ मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्र
शांतात्मा कोटिष्वपि महामुने॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः। इत्थं दृढमति
ः कृष्ण आसीत्संग्राम उल्बणे। इत्थं उल्बणे वा स्थितः समराके ॥६॥ अत्र नः संशयो भूयान्श्रोतुं कौ
तूहलं प्रभो। यः पौरुषेण समरे सहस्राक्षमतोषयत्॥७॥ अत्र हत्वासुरशक्तिं वतियः पौरु
षेण सहस्राक्षं इंद्रं अतोषयत् ॥८॥ सूत उवाच ॥ परीक्षितोथ संप्रश्नं भगवान्बादरायणिः

ः।निशम्यश्रद्दधानस्यप्रतिनंद्यवचोऽब्रवीत्।८श्रीशुकउवाच।।शृणुष्वावहितोराजन्नितिहा
समिमंयथा।श्रुतंद्वैपायनमुखान्नारदाद्देवलादपि।९अवहितःसावधानःसन्वक्ष्यमा
णमितिहासंवृत्रासुरस्यभक्तिप्रतिमयाउच्यमानंयथावत्शृणु।ग।।आसीद्राजासार्वभौम
ःशूरसेनेषुवैनृपः।चित्रकेतुरितिख्यातोयस्यासीत्कामधुङ्मही।।१०शूरसेनेषुमथुराप्रदे
शेकामधुक्सर्वेष्टप्रदा।ग।।तस्यभार्यासहस्राणांसहस्राणिदशाभवन्।सांतानि षट.
कश्चापिनृपोनलेभेतासुसंततिं।११भार्यासहस्राणांदशसहस्राणिकोटिरित्यर्थः।सां ११०
तानिकःस्वयंसंतानार्होपिपुत्रोत्पादनसमर्थोपितासुसंततिंपुत्रंपुत्रींवानलेभे।अत्र

कोहेतुः।सर्वास्तावंध्याएवदैवयोगादेकत्रमिलिताइतिभावः।ग।।रूपौदार्यवयोज
न्मविद्यैश्वर्यश्रियादिभिः।संपन्नस्यगुणैःसर्वैश्चिंतावंध्यापतेरभूत्।१२रूपादिभिःसंपन्न
स्ययुक्तस्यापि।ग।।नतस्यसंपदःसर्वामहिष्योवामलोचनाः।सार्वभूमस्यभूश्चेयंनाभ
वन्प्रीतिहेतवः।१३प्रीतिहेतवःरतिप्रीतिप्रदाः।ग।।तस्यैकदातुभवनमंगिराभगवा
न्ऋषिः।लोकाननुचरन्नेतानुपागच्छद्यदृच्छया।१४एतान्भूर्भुवादिकान्लोकान्
यदृच्छयातस्यैवराज्ञोदैवेनत्वंगिरानारदेनद्देसेउपागच्छत्आजगाम।ग।।संपूजयि
त्वाविधिवत्प्रत्युत्थानार्हणादिभिः।कृतातिथ्यमुपासीदत्सुखासीनंसमाहितः।१५।

राजा उपासीदत्तस्य समीपे उपविवेश। समाहितः किंचित्स्थित्वा एकाग्रमना।ब। महर्षिस्त
मुपासीनं ब्रह्मश्रथावन्तं स्थितो। प्रतिपूज्य महाभागसमासाध्येदमब्रवीत्॥१६॥ समासाध्ये
महाराजेति संबोध्य।ब। अंगिरा उवाच॥ अपि तेः नामूर्यं स्वस्ति प्रकृतीनां तथात्मनः। यथा
प्रकृतिभिर्गृह्यमानश् राजा वसमतिः॥१७॥ अपि किं चिन्नामयमारोग्यं। स्वस्तिसुखं।
प्रकृतिभिः ६ प्रकृत्यधीनमेव हि राज्यं। सदृष्टांतमाह। यथा महदाद्याभिः सप्तभिः प्रकृतिभिः अहंकारप षटी
वतन्मात्राभिः गृह्यमान् जीवो नित्यं ग्रहो भवति। तद्व्यतिरेकेण क्षणमपि तिष्ठति। तथा ११२
राजा वसमतिभिः। स्वाम्यमात्यजनपददुर्गद्रविणसंचयः। दंडो मित्रं च तत्र्वैताः सप्तप्रकृत

यो मताः॥ब॥ आत्मानं प्रकृतिषड्धातिक्षाय श्रेयश्चाप्नुयात्।ब। ज्ञातथा प्रकृतयो नरदेवदि
ताधयः॥१८॥ कलक्षणाभिः प्रकृतिभिर्नित्यं युक्तः सन्नात्मानं प्रकृतिभ्यश्च धापाक्षानि
क्षायतदनुवर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः॥ब॥ अपि दाराः प्रजामात्याः श्रि॥ ॥ भृत्याः ३
ष्योथमंत्रिणः। पौरा जानपदाह्मपास्त्रात्मजा वशवर्तिनः॥१९॥ अमात्याश्च श्रेण्यः समय
विशेषेण संघशो वर्तमाना वणिक्प्रभृतयः पौराः पुरवासिनः। जानपदास्तद्देशाधिका।
रिणः॥ब॥ यस्मात्वात्मा वशगश्चैस्यात्सर्वे तद्वशगा इमे। लोकाः सपाला यच्छंति सर्वे बलि
मतंद्रिताः॥२०॥ तवमनः स्ववशं परवशं वेति पृच्छति। यस्मात्मामनः अनुवशः वशावर्ती

अधीनः तस्य वशगा अणिमाद्या भवंति ॥ ॥ आत्मनाध्रीयते नात्मा परतः स्वयमेव वा
। लक्षयेऽलक्ष्यकामं त्वां चिंतया शबलं सुखं ॥२१॥ आत्मा भवान् आत्मना न प्रीयसे न तु ष्णसीत
ति किं परतो वा स्वतो वा । अलक्ष्यकामं त्वां लक्षये ॥ ॥ एवं विकल्पितो राजन् विदुषा मुनि श्रीशुक उवाच ॥२
नापि सः । प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिं ॥२२॥ विदुषा सर्वज्ञेनापि मुनिना । अल
क्ष्यकामत्वं कथयन् उत्तरं याचते भगवन्निति त्रिभिः ॥ ॥ चित्रकेतुरुवाच ॥ भगवन् किं न वि षटी·
दितं तपोज्ञानसमाधिभिः । योगिनां ध्वस्तपापानां बहिरंतः शरीरिषु ॥२३॥ तथापि पृच्छतो ब्रू ११२
यां ब्रह्मन्नात्मनि चिंतितं । भवतो विदुषश्चापि नोदितस्त्वदनुज्ञया ॥२४॥ लोकपालैरपि प्रा

र्थ्याः साम्राज्यैश्वर्यसंपदः । न नंदयंत्यप्रजं मां क्षुत्तृट्काममिवापरे ॥२५॥ अप्रजं मत्तु तं क्षुत्तृ
ष्णाम अन्नपानकामं जनं अपरे स्रक्चंदनवनितादयो यथा न सुखयंति । तद्वत् मां जानी
हि ॥ ॥ ततः पाहि महाभाग पूर्वैः सह गतं तमः । यथा तरेम दुस्तारं प्रजया तद्विधेहि नः
॥२६॥ पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमो नरकं प्रजया तरेम तथा विधेहि ॥ ॥ श्रीशुक
उवाच ॥ इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः । श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्वि
भुः ॥२७॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत । नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छि
ष्टमदाद्द्विजः ॥२८॥ यज्ञोच्छिष्टं कृतशेषं ॥ ॥ अथाह नृपतिं राजन् भवितैकस्तवात्मजः

हर्षशोकप्रदस्तुभ्यमितिब्रह्मसुतोययौ।२९जन्मनाहर्षंमरणेनचशोकंप्रददातीतित
था।एवमुक्त्वागिराययौ।।ब।।मातापितृभ्याशनादेवचित्रकेतोरधायत।गर्भन्वहंतद्युतिर्देवी
कृत्तिकाग्नेःशिवात्मजं।३०तस्याह्युदितंगर्भःशुक्लपक्षइवोडुपः।द्वैवंधेश्वरसेनेशातेज
साशानकेन्दुपा।३१शूरसेनानांशाशास्यतेजसावीर्येण।बलेयोगर्भःसंवदृधे।।ब।।अथा
कालउपावृत्तेकुमारःसमजायत।जनयन्शूरसेनानांशृण्वतामपिवैमुदं।३२हृष्टोरा
जाकुमारस्यस्नातःशुचिरलंकृतः।वाचयित्वाशिषोविप्रैःकारयामासजातकं।३३जात षटी ११३
कंजातकर्मसंस्कारं।ब।तेभ्योहिरण्यंरजतंवासांस्याभरणानिच।ग्रामान्गजान्सुमदि

धेनूनामर्बुदानिषट्।३४कोटिरेवार्बुदमितिश्रुतेःषट्कोटीःप्रादात्।ब।ववर्षका
मातन्येषांपर्जन्यइवदेहिनां।धन्यंयशस्यमायुष्यंकुमारस्यमहामनाः।३५धन्यंधनक
रं।आयुष्यंआयुःकरं।महामनास्सुदारः।ब।कृच्छ्रलब्धेथराजर्षेःतनयेनुदिनंपितुः
ःयथानिःस्वस्यकृच्छ्राप्तेधनेस्नेहोन्ववर्धत।।३६कृच्छ्रलब्धेकष्टप्राप्तेव्रतादिभिःयथा
निःस्वस्यनिर्धनस्यकृच्छ्रलब्धेधनेयथात्यन्तंप्रीतिर्वर्धते।तथान्वहंदिनंपुत्रेस्नेहोऽ
वर्धत।ब।मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः।कृतद्युतेःसपत्नीनांप्रजाकामज्व
रोऽभवत्।३७मोहसमुद्भवःमोहात्उत्पन्नइत्यर्थःस्नेहस्य।पितुःसकाशात्मातुःअतित

रं पुत्रे स्नेहो ऽभूत् । कष्टेन गर्भं धृतवान् । तत्र तु तेः सपत्नीनां ऽज्ञानिमित्तं ज्वरस्तापो ऽभूत् । अ
नपत्यं तां प्रथमं दुःखं द्वितीयं सपत्न्याः पुत्रो जात इति । तृतीयं सा पुत्रमाता राजमान्या ऽ
ति कृत्वा तासां महद्दुःखमभूत् ॥ चित्रकेतोरपि प्रीतिर्यथा दारे प्रजावति । न तथान्येषु
संजज्ञे बालं लालयतो ऽन्वहं ।३८ ताः पर्यतप्यन्नात्मानं गर्हयंत्यो ऽभ्यसूयया । आनपत्ये
न दुःखेन राज्ञो नादरणेन च ।३९ आनपत्येन अपुत्रत्वनिमित्तेन ॥ धिग् अप्रजां स्त्रियं
पापां पत्युश्चागृहसंमतां । सुप्रजाभिः सपत्नीभिः दासीमिव तिरस्कृतां ।४० प्रथमं स्त्रि
यं स्त्रीजन्म धिक् । तत्रापि अप्रजां । गृहे संमतां न बहुमान्यां ॥ दासीनां को नु संताप

षटी·
११४

स्वामिनः परिचर्यया । अभीक्ष्णं लब्धमानानां दास्याः दासीव दुर्भगाः ।४१ दास्याः दासीय
था तथा वयं दुर्भगाः ॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा । राज्ञो ऽसंमतवृत्ती
नां विद्वेषो बलवानभूत् ।४२ असंमता समा वृत्तिर्जीवनं यासां । ताः ॥ विद्वेषनष्टम
तयः स्त्रियो दारुणचेतसः । गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ।४३ विद्वेषेण न
ष्टा मतिर्यासां ताः । गरं विषं । दुर्मर्षाः असहमानाः ॥ कृतद्युतिरजानन्ती सपत्नीना
मघं महत् । सुप्त एवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे ।४४ शयानं सुचिरं बालमुपधार्य म
नीषिणी । पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ।४५ धात्रीं स्तनदायिनीं ॥ सा श

यानमुपपन्नस्य दृष्ट्वा वेलामारल्लोचनं ।प्राणेंद्रियात्मा निरस्यकं दृत्ता स्मीत्यपतत् भुवि ध्वस्वि
षबलेनऊर्जतेतारेकतनी ।निकेयायोःतेलोचनेयस्यतं दृष्ट्वा ॥ तस्यामृतदाकस्यपेष्टुं
शान्तुरस्वरं घ्नंत्याकरास्यास्तुरजन्चकेरपि ।प्रविश्य राज्ञी वरयात्मजां तिकं ददर्श बाल
सद्मामृतं सुतं ।४७। पपात भूमावुपरि हृदयाश्च वा मुमोह विच्छिन्नशिरोरुहांबरा ।ता
तोनृपांतःपुरवर्णिनाजनाः नराश्चनार्यश्च निशाम्य रोदनं ।आगत्य तुल्यव्यसनाः सुदु पटी· ११५
ता:॥ :दुःखिताश्चाप्यलीकं मरुरुदुःस्मृतागमेः ।४८। विच्छिष्टाः शिरोरुहाः केशाश्चांबरोच्चय
स्याःस्या ।ताश्चसमपन्नो पिव्यलीकं हथारुरुरुदुः ॥ स्तुत्वा घृतं पुत्रमलक्षितां तकं विपन्न

धनो ४

दृष्टिः प्रपतन्नस्वरलनृपःसन्दातानुबंधे षितयाश्च वाम्बृशं विदूर्छितोनुप्ररूतिर्द्धिजै
तः ।४९। अलक्षितःश्चंतकः स्तुत्योर्दे न्नुर्यस्यातं ।अन्नुगताः प्रकृतयोश्चमात्याद्ये
स्येये मः ॥ पपात बालस्य सपादमूले स्रुतस्यविनस्तशिरोरुहांबलरः ।दीर्घं श्वस
नबाष्पाकलोपरो[illegible]निरुद्धकं गेतशाश्वाकमापिर्ते ।५०। बाष्पकला निरस्तुविं
डुनिरस्तु विंडुनिः उपरोधतः संहतं वेनानि रुदरःकंगेयस्या ॥ पतिंनिरीक्षोरुश्चपा
पितं सदाष्टुतं च बालंसुतमेकमंततिः ।जनस्य राज्ञी प्रकृतेश्च हृत्सुजंसतीरध्माता
विललाप विचित्रधा परउफश्चवा पितं बहुशोकेनव्यादांराजानं निरीक्ष्या ॥ अद्दो

विक्षातस्त्वमतीव बालिशो यस्त्वात्मसृष्टेष्वतिरूपमीहसे। परेऽनुजीवंत्यपरस्य या मृतिः वि-
पर्ययश्चेत्त्वमपि ध्रुवं परः। पर एवात्मसृष्टेः अप्रतिरूपं ईहसे चेष्टसे। अन्ये परे वृद्धा
जीवंति अपरस्य या मृतिस्तत्। तदादिरूपस्य सृष्टिसामर्थ्याभावे बालेषु मृतेषु मतिर्भव-
सृष्टिर्नस्यादित्यर्थः। ननु सांप्रतं स्वसृष्टेः विपरीतो रीतोऽस्मीति चेत्तत्राह। विपर्ययश्चेद्वि-
परीतोऽसि चेत्तर्हि त्वं प्राणिनां रक्षकारिवात् ततो ध्रुवं नित्यं परः शत्रुरसि न तु रक्षपा-
लुरित्यर्थः। ननु जीवस्य कर्मानुसारेण जन्मादिकर्तृत्वात् मम कोऽपराधस्तत्राह। नहीति। आ- षटी० ११६
नादिकर्मरश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः। यः स्नेहपाशो निजसर्ग-

वृद्धये स्वयं त्वया कृतस्ते तमिमं विवृश्चसि। यथा पुत्रे जीवत्येव पिता म्रियते पितरि जीवत्येव पु-
त्रोऽपि यत इति क्रमो नास्ति। कर्माधीनत्वात्। इति चेत्। तर्ह्यात्मकर्मभिरेव तज्जन्मा-
दिकमस्तु किं त्वया कृत्यं। ननु मयेश्वरेण विना जडैः कर्मभिः इदं कथं सिध्येत। भवतु न-
मा तथापि निजसर्गवृद्धये त्वया यः स्नेहपाशः कृतः तमिमं स्वयमेव वृश्चसि छिन-
त्सीत्यादिको दोष इति। नह्येवं विधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं न करिष्यतीति भा-
वः। बालाग्रं तात नार्हसि मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं। अंजसा
रेम भवता प्रजडः स्तरं यत् ध्वांतं नयाह्यकरुणेन यमेन दूरं। पपत्रप्रजडस्तरं त्वजसो

दुस्तरं त्वकरुणेन निर्दयेन यमेन स महद्दूरं मायाद्वितो ॥५६॥ उत्तिष्ठ तात त इमे शिशवो वयस्या
स्त्वामाह्वयंति नृपनंदन संविहर्तुं सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब
शुचो हर नः स्वकानां ॥५७॥ अशनया क्षुधया परीतः पायसं भुंक्ष्व स्तनं वा पिब स्वकानां
नः शुचो हर ॥५७॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं ॥
किं वा गतोस्यपुनरन्वयमन्यलोकं नीतो घृणेन न शृणोमि कला गिरस्ते ॥५८॥ अहं हतमंगला तनूज
हे पुत्र नाहं पश्ये मंगलार्थमागता सती नवमुग्धस्मितं वक्त्रं तद्ददृशे न दृष्टवत्यस्मि इदा
नीमपि गिरो न शृणोमि तर्हि किं अपुनरन्वयं पुनरागमनं यथा न भवति तथा गतो

सि किं ॥५८॥ श्रीशुक उ० ॥ विलपंत्या मृतं पुत्रमिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो
मुक्तकंठो रुरोद ह ॥५९॥ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः ॥ रुरुदुः स्म नरा नार्यः
सर्वमासीदचेतनं ॥६०॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकं ॥ ज्ञात्वांगिरा नाम ऋषि
राजगाम सनारदः ॥६१॥ कश्मलं दुःखं प्राप्तं नष्टसंज्ञं दुःखेनाक्रांतत्वात् अनायकं अप्र
तिबोधदातारं ॥६१॥ ॥इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे चित्रकेतुविलापो ना
म चतुर्दशोध्यायः ॥ ॥१४॥ ॥ततः पंचदशे चित्रकेतोः शोकापनोदनं ॥ ज्ञतं तत्त्वोपदे
शेन नारदेनांगिरो मुजा ॥१॥ श्रीशुक उवाच ॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमं

॥३॥ कस्मिन्त्वं राजानं बोधयंतीत्याह कस्मिन्निति॥४॥ मह कस्मिन्निर्दिष्टोपदेशौ श्रीनारदउ॥ को
यं स्यात्तव राजेंद्र भवान्यमनुशोचसि। त्वं वास्य कतमः सृष्टौ पुरेदानीमतः परं॥४॥ बंध
स्य बंधूनां मध्ये कतमः। कः सृष्टौ प्रजासृष्ट्यां। अयं मे पुत्रस्त्वं चास्य पिता। इति चेत्
ताद्दृ। पुरेति पूर्वजन्मनि पुत्रादिरूपेण संयुक्ता आसन्नेतस्य मरणेन ततो वियुक्ताः सं
तो वर्तमानजन्मनि कदाचित्तस्यैव वा अन्यस्य वा पुत्रादयो भवंति। नेजन्मांतरे तस्यैव वा अ षटी·
न्यस्य पित्रादयो भवंति। शत्रुमित्रादयो वा। अतो नायं नियम इति भावः। अहं पिता अ १२८
यं पुत्र इति। तमेवाभिप्रायं प्रकटयति। यथेति॥६॥ यथा प्रयांति संयांति स्रोतोवेगेन वालु

का। संयुज्यंते वियुज्यंते तथा कालेन देहिनः॥ स्रोतसः प्रवाहस्य वेगेन यथा वालु
काः प्रयांति वियुज्यंते। संयांति संयुज्यंते। तथा कालवेगेन देहिनो जीवा अपि। ननु त
थाप्येतावंतं कालं मम पुत्रोऽभूत्। वार्धुके जातो मृत इति दुःखं। इति चेत्तत्राह यथेति॥
७॥ यथा धानासु वै धाना भवंति न भवंति च। एवं भूतेषु भूतानि चोदितानीशमायया
॥ यथा धानासु बीजेषु धाना बीजांतराणि भवंति। तासु च कदाचिन्न भवंति। नोत्पद्यं
ति नश्यंति वा। न तु भवत्स्वेव तिष्ठत्येवेति नियमः। एवमेव भूतानि पुत्रादिरूपाणि। अ
तो धानानां जन्मजनकत्वेपि यथा पितृपुत्रादिभावो नास्ति। एवमत्रापीति। अतः शोको

भूतेषु पित्रादिषु २

नकार्य इति भावः। ईशमायाप्रेरितानामेव भवनमभवनं। नवस्तुतः। तस्य चेश्वरस्य
सर्वसाधारणत्वात् न पुत्रएव वशो वर्तनीय इत्याशङ्क्य। वयमिति॥८॥ वयं च त्वं च ये चेमे तुल्य
कालाश्चराचराः। जन्मस्थलोर्यथा पश्चात् प्रागेवमधुना विनो। पञ्चल्पकालावर्त्तमानका
लीनाः। जन्मनः प्राक् पूर्वस्मात् पश्चाल्लयथानेसंतः। एवमधुनापि न संति। अहो इत्यपतेक
थं न संति। तत्राह। आद्यंतयोरसत्त्वात् स्वप्नवदित्यर्थः। ननु अस्य चैकथं प्रतीतिः। कथं वा अ घटी ११९
हमस्य जनकः इत्याद्यभिमानस्तत्राह। भूतेरिति॥९॥ भूतैस्तैर्भूतानि सृष्टेश्वरः स्वजस्य वतिहत्ल
जः। आत्मसृष्टैः स्वतंत्रैः रनपेक्षोपि बालवत् ईश्वरेण मायया सृष्टत्वात् प्रतीतिर्निमि

त्तमात्रेणैव वस्तुतानामयमभिमान इति भावः। ननु ईश्वरस्य सृष्ट्यादिभिः साध्यमस्ती
ति चेत्। अपूर्वकामताप्राप्ता। नास्ति चेत् कुतः सृष्टिः। तत्राह॥ अनपेक्षोपि बालवल्ली
लया करोति। अथ यं च जन्मादिव्यवहारो देहानामेव। नात्मन इत्याह॥ ८॥ देहेन देहिनां
जन्म देहाद्देहो भिजायते। बीजाद्वृक्षो यथा बीजं देहस्यार्थ इव शाश्वतः। पु देहिनः पितुर्देह
न देहिनः पुत्रस्य देहो मातुर्देहाद्भिजायते। यथा बीजाद्वृक्षबीजं जायते। देही तु शाश्वत
एव। अर्थोन्मुप्यलेजो भिनयथान्तरल्। ननु नश्वरदेहप्रतिप्रतिप्रियो गित्वात् देहस्य पिनश्व
श्वतः स्यात्। तत्राह॥ देह इति॥११॥ देहे देहविभागो यमविवेककृतः पुरा। जातिव्यक्तिवि

भागोयं यथावस्तु निकल्पितः ।८ देहदेहिनोरयं परस्परं प्रतियोगविभागः । पुराऽज्ञानाद्वि
सविवेकस्ततः अज्ञानकल्पितो न वस्तुतः । ज्ञातिमात्मान्यथा किं विशेषः । तयोर्विभागो
यथावस्तु निमित्तात्मजीवेकल्पितः । परस्परापेक्षसिद्धित्वेनप्रतिरूपत्वात तलवत् ॥बा॥
श्रीशुक उ ॥ एवमाश्वासितो राजा चित्रकोऽपि द्विजोक्तिभिः । प्रहृष्टः पाणिना वक्त्रमाधिम्ल
तमभाषत ।ए राजा स्वाधिम्लानं वक्त्रं पाणिना प्रहृष्टः अश्रुमार्जनं कृत्वा अभाषत ॥बा॥ चित्र षटी·
केतुरुवाच ॥ कोऽपुवां ज्ञानसंपन्नौ मदिष्टौ वमदीयमां । अवधूतेन वेषेण गूढाविह स्म १२०
भागतौ ।१० चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः । मादृशां ग्राम्यबुद्धीनां बोधायोन्म

त
लिंगिनः ।११ उन्मत्तस्यैव लिंगं विषयो येषां ते ॥बा॥ कुमारो नारदऋभुरंगिरा देवलोऽसित
ः । अपांतरतमो व्यासो मार्कंडेयोऽथ गौतमः ।१२ वसिष्ठो भगवान् रामः कपिलो बादराय
णिः । दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथारुणिः ।१३ लोमशश्च्यवनो दत्तः आसुरिः ।
सपतंजलिः । ऋषिर्वेदशिरा बाह्योमुनिः पंचशिखस्तथा ।१४ हिरण्यनाभः कौशल्यः श्रु
तदेवऋतुध्वजः । एते परे च सिद्धेशाश्चरंति ज्ञानदेववः ।१५ एतेषां ऋषिमुख्यानां कौयु
वां ज्ञानपारगौ । कथ्यतां रूपयामहं तावद्ज्ञानामि कुःखितः ।१६ तस्मात् युवां ग्राम्यपशोर्म
मस्छूढधियः प्रभू । अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां ।१७ ममप्रवृत्त्वरहस्तकौ । बोधसमर्था

विदितवा। अनात्मस्वप्यात्मबुद्धेतमसि स्वज्ञानांधकारे निमग्नस्य मे ज्ञानदीपः इत्यर्थः तां प्र
वर्त्मितां।१७। अंगिरा उवाच॥ अहं ते पुत्रकामस्य पुत्रदोऽस्म्यंगिरा नृप। एष ब्रह्मसुतः सा
क्षान्नारदो भगवानृषिः।१८ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे। अतदर्हमनुस्मृ
त्य महापुरुषगोचरं।१९ अनुग्रहाय भवतः प्राप्तावावामि
ह प्रभो। ब्रह्मण्यो भगवद्भक्तो नावसादितुमर्हसि।२० तदैव ते परं ज्ञानं ददामि गृह
मागतः। ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहं।२१ तदैव यदा पूर्वमागतौ स्मि।टी॥ अधु
नापुत्रिणां तापो भवतैवानुभूयते। एवं दारा गृहा रायो विविधैश्वर्यसंपदः।२२ रायस्त्वैश्वर्या

षटी·
२२१

:सर्वे पुत्रवत्स्वैवेति।टी॥ शब्दादयश्च विषयाश्चला राज्यविभूतयः। राज्यं मही बलं कोशो
भृत्यामात्यसुहृज्जनाः।२३ चला अनित्याः।टी॥ सर्वेपि शूरसेनेमे शोकमोहभयार्ति
दाः। गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः।२४ हे शूरसेन राजन् इमे सर्वेपि शोकादिप्रदाः
। आगमापायित्वेन गंधर्वनगरतुल्याः। गंधर्वनगरं हि कस्मादेव कचिदायाति अपयाति
ति प्रसिद्धं। तद्वदनित्यत्वं शोकादिहेतुत्वं च आगमापायित्वं चोक्तं मिथ्यात्वमप्याह स्व
प्नश्च माया च मनोरथश्च स्वप्नवद्यथा।टी॥ दृश्यमाना विनार्थेन न दृश्यंते मनोभवाः। कर्म॥
भिर्ध्यायतो नाना कर्माणि मनसोभवन्।२५ मनोभवा मनोमात्रविजृंभिता। तत्र हेतुः

अर्थेन तावित्केन स्वस्वरूपेण विना दृश्यमाना। तत्कुतः। यस्मात्तल्लक्षणां तैरेव दृश्यंते तल्लक्षणां तैरेव दृ
श्यंते। अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः। द्वैद्वे तद्गुणपांगुण्यमहा। न
ता इति मीमांसकः प्राह। तत्कुतो मनोमात्रत्वं। तत्राह। कर्मनिर्हारिति। कर्मवासनाभिः अ
र्थान् ध्यायतः पुंसो मनस एव निमित्तात् कर्माण्यपि भवंति। पाठांतरे कर्मनिर्हारिति तत मम नि
ध्यायं तदित्यर्थः। कर्मणोपि मनोभवत्वात् तत्साध्या अर्था अपि मनोभवा एवेति भावः। तदे
तं मम तास्पदानां दुःखादिहेतुत्वमुक्तं। तत्र देहसंबंधो मूलमित्याह। येनेति॥४१॥ अयं षटं०
हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः। देहिनो विविधक्लेशसंतापकृदुदाहृतः॥ अ १२२

यं हीत्यवधारणे। अयं देहः। द्रव्यज्ञानक्रियात्मकः। द्रव्यं तमोगुणः ज्ञानं सत्त्वं क्रिया रजः। अ
धिभूताधिदैवाध्यात्मरूपो देह एव देहिनः देहोऽहमिति मन्यमानस्य देहिनो जीवस्य
विविधान् क्लेशान् संतापांश्च करोतीति तथा॥४२॥ तस्मात्स्वस्थेन मनसा विमृश्य गति
मात्मनः। द्वैते ध्रुवार्थविश्रंभं त्यक्त्वोपशममाविशेत्॥४३॥ स्वस्थेन अव्यग्रेण। गतिं त
त्त्वं ध्रुवोयमर्थ इति विश्रंभं विश्वासं प्रणयं वा त्यजेत्। ततश्च उपशममाविशेत्। आश्रयेत्। अं
गिरसा उपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यमिति तत्प्रसादाय मंत्रविद्यामुपदिश
ति नारदः॥४४॥ श्रीनारद उवाच॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम। यां धारयन्स

स्वरात्रात्त्वंद्रष्टासंकर्षणंविभुं।२८।मंत्रोपनिषदं।उपनिषत्संपरंश्रेयास्यामित्युपनिषत्।मं
त्रएवोपनिषत्।तांप्रतीक्ष्य ग्रहाण।द्रष्टाद्रक्ष्यसिनचिरात्॥ठ॥यत्पादमूलमुपसृत्यनरेंद्र
पूर्वेंशर्वादयोभ्रममिमंद्वितयंविसृज्य।सद्यस्तदीयमतुलानधिकंमहत्त्वंप्रापुर्भवानपि
परंनचिरादुपैति।२९।अतुलंच।तदनधिकंच।समानाधिकशून्यंपरंमहिमानंप्रापुः।
उपैतिउपेष्यति।प्राप्स्यसीत्यर्थः॥ठ॥ ॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेनारद षटी·
चित्रकेतुसंवादेपंचदशोध्यायः॥ ॥ठ॥ ॥षोडशेतत्स्तुतोक्त्यैवविशोकीकृत्यतंनृ १२३
पं।आदिदेशमहाविद्यांनारदःशेषतोषणीं।ठ।श्रीशुकउवाच॥अथदेवऋषीराज

न्संपरेतंनृपात्मजं।दर्शयित्वेतिहोवाचज्ञातीनामनुशोचतां।१।आदौतावत्तच्छरी
रेणैवपितृभ्रात्रादिसंबंधोमिथ्येतिदर्शयितुंयोगबलेनतमेवज्ञातीनांदर्शयित्वाजी
वात्मन्नित्यादिउवाच।ठ॥श्रीनारदउवाच॥जीवात्मन्पश्यभद्रंतेमातरंपितरंचते।सु
हृदोबांधवास्तप्ताःशुचात्वत्कृतयाभृशं।२।कलेवरंस्वमाविश्यशेषमायुःसुहृद्वृ
तः।भुंक्ष्वभोगान्पितृप्रत्तानधितिष्ठनृपासनं।३।शेषमवशिष्टंआयुरस्तिअपष्ट।
स्तुताविवदानेनदृष्टत्वात्।तदाकलेवरंप्रविश्यउत्थितोजीवस्तूवाच।ठ।कस्मिन्
जन्मन्यमीमह्यंपितरोमातरोभवन्।कर्मभिर्भ्राम्यमाणस्यदेवतिर्यङ्नृयोनिषु।४।

दोमयिमृतेपुत्रेदष्याशोकश्चेत्। शत्रुदष्याद्दर्षः किंनक्रियते। इत्याशयेनसंबंधस्यानिय
तत्वमाह॥३॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः। सर्वएवहिसर्वेषांसंभवंतिक्रमशो॥
मिथः॥ पविवाहादिसंबंधिनोबांधवाः ज्ञातयः सपिंडाः अरयोघातकाः। मित्राणिस्ने
काः। मध्यस्थाउभयव्यतिरिक्ताः। विद्विषोद्व्यादिनिमित्तेनद्वेषः। उदासीनास्त्वघातिरे
काः। इतिभेदः। कर्मभिर्भ्राम्यमाणेदृष्टांतः॥४॥ यथावस्तूनिपण्यानिहेमादीनिततस्त षटी·
तः। पर्यटंतिनरेष्वेवंजीवोयोनिषुकर्तृषु॥ व्य० यथापण्यानिक्रयविक्रयाघांदीणिघोटक १२६
हेमादीनिकर्तृषुव्यवहरंति। परिभ्रमंति। एवंजीवोपियोनिषुजनकेषु॥४॥ नित्यस्यार्थ
नि

स्यसंबंधोह्यनित्योदर्शयतेनत्वं॥ यावद्यस्यहिसंबंधोममत्वंतावदेवहि॥५॥ नित्यस्यजीव
तोपिअर्थस्यपश्वादेः अनित्यः अनियतः विक्रियादिनासंबंधनिवर्तते। यावद्यस्यहिसंबं
धोममत्वंतावदेव॥५॥ एवंयोनिगतोजीवःसनित्योनिरर्थकस्ततः। यावद्यत्रोपलभ्येततावं
स्तत्वंहितस्यतत्॥६॥ एवंयोनिगतःपित्रादिसंबंधप्राप्तोपिसजीवोनित्यः। देहजन्मादि
नातस्यजन्माद्यभावात्। अतएववस्तुतोनिरर्थकस्ततः। अद्भुमस्यपुत्रः इत्यभिमानश्चत्य
ः। यत्रपित्रादौसंबंधिनियावदुपलभ्येतकर्मवशानवर्तेत। तावदेवतस्यपित्रादेःत॥
स्मिन्स्वत्वं। ननुमरणविक्रयाद्युत्तरकालमपि। यदुक्तंकलेवरंस्वमात्विरूपेनितत्रादृ

स्मिन्कलेवरेममेदानीं। स्वत्वं निहतं। अत्र दृष्टांतमाह॥ नित्यस्य चिरकालावस्थायिनः
सुवर्णादेः तथा यो निर्गतो देहं प्रविष्टः तत्रास्मिन्देहे स्वत्वं। नतु मरणोत्तरकालमपी
त्यर्थः। शेषं समानं। जीवस्य नित्यत्वं साधयति एषेति।८। एष नित्यो व्ययः सूक्ष्मः एष स
र्वाश्रयः स्वदृक्। आत्ममायागुणैर्विश्वमात्मानं सृजति प्रभुः। एष नित्यः तत्र हेतुं। अव्य
व्ययः अपक्षयशून्यः। तत्र कुतः सूक्ष्मः। जन्मादिशून्यः। तत्र कुतः सर्वाश्रयः। जन्मादिम
तो देहादेः आश्रयः नतु देहादिरूपः। यतः स्वदृक् स्वप्रकाशः। सर्वाश्रयत्वमुपपादयति षटी. १२५
ति। आत्ममायागुणैः आत्मानमेव विश्वं विश्वात्मकं सृजति। तदात्मानं स्वयमकुरुते

ति श्रुतेः। उपादानकारणत्वात् सर्वाश्रय इत्यर्थः। जीवस्य वस्तुतो ब्रह्मत्वात् ब्रह्मण एव वि
च्छक्तिविशिष्टस्य ईश्वरस्यैव तत्स्रष्टृत्वात् जीवः सृजतीति वा बोध्युक्तिः। यद्वा स्वकर्मव
शात् सृष्टिनिमित्तत्वेन स्रष्टृत्वं। सोऽप्यस्य व सर्वस्य लोकाश्रयत्वात्। सर्वाश्रयत्वं वोक्तमि
य. ति द्रष्टव्यं।ऽ।ऽ एकं सुहृद्धृत इति। सुहृदो बांधवास्स्वाहा इति च। तत्राप्याह।९। नह्यु॥
स्याति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा। एकः सर्वधियां द्रष्टा कर्तृणां गुणदोषयोः
।१० तत्र हेतुः एकः सुहृदादिसंसाररहितः। तत्र कुतः गुणदोषयोर्हिताहितयोः कर्तृणां
तु मित्रादीनां याः सर्वा धियः विचित्राभिप्रायाः तासां द्रष्टा साक्षी। यद्वा कर्तुं स्वभोगा

तत्राप्याह ॥ब॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलं । उदासीनवदासीनः परावर
दृगीश्वरः ॥११॥ गुणं सुखं दुःखं क्रियाफलं च राज्यादि नाददत्ते नांगीकरोति । यत उदासीन
वदासीनः । उदासीनवदेतुः परावरदृक् कार्यकारणसाक्षी । ननु सोक्ता । यतः ईश्व
रः देहादिपरतंत्रश्च न्यः । अत एवं तत्स्य मम च दृष्ट आकं च संबंधाभावाधी तच्छोकं प
त्रिमित्तं माकुरुतेति वाक्यार्थः ॥ब॥ श्रीशुक उवाच ॥ इत्युदीरितगतो जीवो ज्ञातयस्तस्य ष.टी.
ते तदा ॥ विस्मिता मुमुचुः शोकं छित्त्वात्मस्नेहशृंखलां ॥१२॥ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृ १२५
त्वोचिताः क्रियाः । तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं ॥१३॥ बालघ्न्यो व्रीडितास्तत्र बा

२

लहत्याहतप्रभाः । बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं । यमुनायां महाराज स्म
रंत्यो द्विजभाषितं ॥१४॥ निर्मत्सराश्च निःक्रोधा निंदंत्यः स्वयमात्मना ॥१५॥ अत्रात्मनात्मानं निं
दंत्यः द्विजभाषितं च ऋगिरस्मा प्रोक्तं बालहत्याव्रतं चेरुः ॥ब॥ स इत्थं प्रतिबुद्धात्मा चित्रके
तुर्द्विजोक्तिभिः । गृहांधकूपान्निःक्रांतः सरःपंकादिव द्विपः ॥१६॥ गृहमेव अंधकूपः त
स्मात् स्वज्ञानात् निःक्रांतः सरसः पंकात् गजो यथा स्वयमेव निःसरति तथा अतिधीर
स्य तस्यैव निःक्रमणं योग्यं नान्यस्यैवेति भावः ॥ब॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्य
जलक्रियः । मौनेन संयतप्राणो ब्रह्मपुत्राववंदत ॥१७॥ कृतपुण्यजलक्रियः कृता पुण्य

जलक्रियाः।तर्पणाद्यायेन।संयतप्राणोनियतेंद्रियःसनब्रह्मपुत्रौनारदांगिरसाववंदत
।७।अथतस्मैप्रपन्नायभक्तायप्रयतात्मने।भगवान्नारदःप्रीतोविद्यामेतामुवाचह।१७।
तांवक्ष्यमाणांविद्यां।७।नमस्तुभ्यंभगवतेवासुदेवायधीमहि।प्रद्युम्नायानिरुद्धायनमः।
संकर्षणायच।१८।नमोधीमहि।ध्यायेममनसा।७।नमोविज्ञानमात्रायपरमानंदमूर्त्तये
आत्मारामायशांतायनिवृत्तद्वैतदृष्टये।१९।नद्वैतेनअज्ञानेनभेदेनआवृतादृष्टिर्य
स्यतस्मै।यद्वा।।निवृत्ताद्वैतदृष्टिर्यस्मात्।७।आत्मानंदानुभूत्यैवन्यस्तशक्त्यूर्मयेनम षटी: १२६
ः।हृषीकेशायमहतेनमस्तेनंतमूर्त्तये।२०।न्यस्तानिरस्ताशक्त्यूर्मयःमायाविभिन्नाराग

देव्यादयोयेन।७।।वचस्युपरतेप्राप्ययएकोमनसासह।अनामरूपश्चिन्मात्रःसोव्यान्नः
सदसत्परः।२१।मनसासहवचसिअप्राप्यपरतेसतियःएकएवप्रकाशते।अपनीतिसर्वे
न्द्रियोपलक्षणं।सोस्मान्नव्यात्।सदसत्परःकार्यकारणयोःकारणं।तदेवाह।यस्मिन्नि
ति।७।यस्मिन्निदंयतश्चेदंतिष्ठत्यप्येतिजायते।मृण्मयेष्विवमृज्जातिस्तस्मैतेब्रह्मणेन
मः।२२।यस्मिन्निदंकार्यकारणंवतिष्ठति।अप्येति।यतश्चजायते।मृण्मयेषुघटादिषुमृ
ज्जातिःमृन्मात्रमेव।७।यन्नस्पृशंतिनविदुर्मनोबुद्धींद्रियासवः।अंतर्बहिश्चविततंव्यो
मवत्तन्नतोस्म्यहं।२३।सर्वानुस्यूतंयतुतस्मै।ननुसर्वानुस्यूतंचेत्तर्हिज्ञातिवस्तुनीयेन

।कथंमनसोवचसोरगोचरत्वादित्याह।यद्ब्रह्मव्योमवद्विततमपिअप्रसवःप्राणाःक्रियाश
क्त्यानस्पृशंति।मनआदीनिचज्ञानशक्त्यानविदुः।तद्ब्रह्मततोऽस्मितेषांप्राणादीनां
तदज्ञानेहेतुमाह।देहेंद्रियेति।७।देहेंद्रियप्राणमनोधियोमीयदंशाविद्धाःप्रचरं
तिकर्मसु।नैवान्यदालोहमिवाप्रतप्तंस्थानेषुतद्द्रष्टृपदेशमामनंति।३८।देहेंद्रियोमीय
दंशाविद्धाःतस्यैवचैतन्यांशेनआविष्टाःसंतःकर्मसुस्वस्वविषयेषुप्रचरंति।जाग्रत्स्वप्नयो पटी॰
ःअन्यदासुषुप्तिमूर्छादौनैवप्रचरंति।यथाअप्रतप्तंलोहंनदहति।अतोयथालोहं १२८
सद्भिशक्त्यैवदाहकं।अग्निंविनानदहति।एवंब्रह्मगतज्ञानक्रियाशक्त्यांप्रवर्तम

।नादेहाद्यःतंनस्पृशंति।नविदुरित्यत्रभावः।जीवस्त्वहंद्रष्टेत्याकारेण।नेत्यादेःस्थानेषु
जाग्रदादिषु।द्रष्टृपदेशंद्रष्टृसंज्ञांतदेवेतिप्राप्नोति।प्राप्नोति।नान्योजीवोनामास्तिना
न्योतोऽस्तिद्रष्टेत्यादिश्रुतेः।यद्वा।द्रष्टृपदेशंद्रष्टृसंज्ञांजीवमपिएतदेवएतिजानाति।
नतुजीवस्तज्जानातीत्यर्थः।एवंनमस्कृत्यमंत्रमाहशिरेति।७।ॐनमोभगवतेमहापु
रुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढकरकमलकुड्म
लोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते।२५सकलायेसात्वतपरिवृढा
तेषांकरकमलानांकुड्मलैःमुकुलैःउपलालितंचरणारविंदयुगलंयस्य।तस्यसं

बोधनंदृष्टंपरमगुह्यंइष्ट। परमेष्ठिन्सर्वेश्वरतेनमोस्तु॥ब॥श्रीशुकउवाच॥भक्तायैतांप्रप
न्नायविद्यामादिश्यनारदः। ययावंगिरसासाकंधामस्वायंभुवंविभो॥२६पूर्वंसनारदोऽत्रं
गिराश्चाजगामेत्यंगिराश्वाधान्यनोक्तः। चित्रकेतोःकृत्रपदद्वयेनतस्यदृष्टयुक्तत्वात्इ
दृष्टनारदोंगिरसासाकंययौ। इतिनारदस्यप्राधान्यनिर्देशः। तदुपदेशेनतस्यवैराग्या
त्वंतेः। अत्रोद्देसमर्थानां॥ चित्रकेतुस्तुतांविद्यांयथानारदभाषितां। धारयामाससप्ताहं
अब्भक्षःसुसमाहितः॥ अब्भक्षयथावत्सप्ताहंधारयामाससा॥ब॥ततश्चसप्तरात्रांतेविद्य
याधार्यमाणया। विद्याधराधिपत्यंसलेभेऽप्रतिहतंनृप॥२८विद्याधराधिपत्यंअवांतर

षटी·
२२९

फलंविघ्नरूपंलेभे। अप्रतिहतमस्खलितं॥ठ॥ततःकतिपयाहोभिर्विद्ययेद्धमनोग
तिः। जगामदेवदेवस्यशेषस्यचरणांतिकं॥२९कतिपयैरहोभिः विद्ययाइद्धेनदीप्तेन
मनसासमागतिर्यस्यासः। विमानारूढःसन्देवदेवस्यशेषस्यसंकर्षणस्यचरणांतिकं
जगाम॥ठ॥मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणं। प्रसन्नवक्त्रा
रुणलोचनावृतंददर्शसिद्धेश्वरमंडलैःप्रभुं॥३०मृणालवद्गौरं। शितिवाससंकृष्णां
बरंस्फुरंतिकिरीटादीनियस्य। कटित्रंमेखला। प्रसन्नानिदरशनानिवक्त्राणियस्य
अरुणानिलोचनानियस्यतंचतंच॥ठ॥तद्दर्शनध्वस्तसमस्तकिल्बिषःस्वस्थामलांतः

करणेऽन्ययात्वं मुनिः। पवर्गपंचका वर्णयास्तुतो वनः प्रकृष्टरोमा तमदादिरूपं ॥२१॥ दृष्ट्वा
व तमादिरूपं अन्ययाऽऽचरणं गतः सन् अन्नतमत्नाम कथंभूतः। तस्य दर्शनेन धस्त्वं मम
स्तं किं विशिष्टस्य। स्वच्छममलं चांतःकरणं यस्य। प्रणयेन श्रुत्युक्ते लोचने यस्य। प्रकृ
ष्टानि रोमाणि यस्य ॥२१॥ सज्जनमश्लोकपदाब्जविष्टरं प्रमाश्लेषोरुपरं महयत्सुज
ः। प्रेमोपरुद्धाखिलवर्णनिर्गमो नेवाशकन्नं प्रसमीडितुं चिरं ॥२२॥ तं प्रसमीडितुं स्तोतुं चि
रं नेवाशकन्। तत्र हेतुः। सज्जनमश्लोकस्य पदाब्जयोः विष्टरमासनं प्रमाश्रुभिरूपमेदय षदी· १३०
न्नभ्यषिंचन्। प्रेम्णा उपरुद्धः अखिलानां वर्णानां निर्गमनं उच्चारणं यस्य ॥२२॥ ततः समाधा

य मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ। नियम्य सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं
सात्वतशास्त्रविग्रहं ॥२३॥ मनीषया बुद्ध्या मनः समाधाय एतद्बभाषे। प्रतिलब्ध
वाक् येन। सात्वतशास्त्रोक्तो विग्रहो यस्य। तं। चतुर्भुजपीतांबरधरमित्यर्थः ॥२३॥ चित्रके
तुरुवाच। अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता। विजितास्तेपि
च भजतामकामात्मनां य आत्मदोतिकरुणः ॥२४॥ अन्यात्यथेमजातं दन्तिहृतानुस्वामि
सेवकान् अजिमिनं दस्युदास्तो नित्यशाभिः पंचभिर्वितुं ॥ हे अजित त्वं अन्यैः अजितोपि भव
त्वं साधुभिर्भक्तैर्जितः। आत्मसात्कृतः। यतो भवान् अतिकरुणः। तेपि च तैः कामात्म

पि भवता विजिताः। स्वाधीना एव स्थिताः। योऽभवान् स्वकामात्मनां आत्मानां आत्मानमेवद
दासि। ननु पक्षैरेव कथं जिताः। यतः स्पर्द्धमानैरपि हत्यारिकंदर्पभिः स्वैः ईश्वरैर्जयसंभ
वात्। तत्राह। तवेति॥७॥ तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि। विश्वसृजस्ते
त्रां शातनष्ठषाय्यर्द्धतिष्ठथगतिमत्या। उपजगत उदयादीनि तवैव विभवः। विभवनं लील
आदिशाष्टतत्त्ववेशानियमनादीनि। विश्वासृजस्तु ब्रह्मादयोऽनेश्वराः। किंतु तत्तांशोष
उरुषः तस्यांशाः। तत्र एवं स्थिते न पिहथक् ईश्वरा वयमित्यभिमानेन हथैव स्पर्द्धंते। वमे षटी। २३२
दृष्टव्यादिकर्तृत्वेतडपपाद्यति॥८॥ परमाणुपरममहतोवमाद्यंतांतरवर्त्ती त्रयविधुरः॥

आद्यावंतेव सत्त्वानां यत् ध्रुवं तद्देवांतरालेपि॥ परमाणुः सूक्ष्मं मूलकारणं। परंमहत्तत्त्व
तिमं कार्यं तयोस्त्वमेवाद्यंतांतरवर्ती। आद्यावंतेऽंतरे मध्ये च वर्त्तितुं शीलं यस्य सः। अत एव
त्रयविधुरः। आद्यंतमध्याक्षन्यो ध्रुवः। तेच त्वयासुत्यंते नत्तु ध्रुवा। कुतः स्यात्। सत्त्वानां स
त्वेन प्रतीतानां कार्याणामाद्यावंतेपि तद्देव ध्रुवं सुवर्णादिवत्। एवं ध्रुवत्वेन कालः परिच्छेदो।
नास्तीत्युक्तं। देशतोप्यपरिच्छेदमाह। द्विस्यामिति॥१०॥ द्विस्यादिभिरथ किलाष्टतः स
म भिर्दशगुणोत्तरैरंडकोशाः। यत्रपतत्यणुकल्पः सदांडोकोटिकोटिभिरदनंतः॥
पूर्वस्मात्पूर्वस्मात् दशगुणमुत्तरैरधिकैरावृतः। यत्र त्वयि अणुकल्पः परिभ्रमति। त

तस्मादेतं तस्त्वं।यस्मादेवं परमेश्वरस्त्वमेव अन्ये देवास्तव विभूतयः अतस्त्वां विहाय विषय
कामनयान्योपासकाः इति मंदा इत्याह॥७॥ विषयतृष्णोत्तरपश्वावो य उपासते विभूती
र्न परं त्वां। तेषामाशिष ईश तदनु विनश्यंति यथा राजकुलं। विषायेषु तृष्णया येषां ते न
राकाराः पश्वव इव नराः। ये विभूतीः इंद्राद्याः उपासंते न परं त्वां। ततः किं तत्राह। तेषामिति।
तदनु उपास्यानां नाशानंतरं यथा राजकुलमनु राजकुलानां नाशानंतरं तत्सेवकानां आशि षटी·
षो नश्यंति तद्वत्। अयं च परमो वधिः मध्येपि नश्यत्येव। विषयकामेनापि हरतावत्सेवा मोक्ष १३२
फलैवेत्याह॥८॥ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि। ज्ञानात्मन्यगु

णमये गुणगणतोस्य द्वंद्वजालानि॥९॥ कामधियः विषयकामना अपि हे परम त्वयि
रचिता हता वेत्तनरोहंति देहांतरोत्पत्तये न भवंति। यथा करंभबीजानि न प्ररोहंति। य
तोस्य जीवस्य गुणगणात् द्वंद्वबंधा न भवंति। अतः कामेनापि निर्गुणस्य तव भजनात्
ज्ञानैः ज्ञानैर्नैर्गुण्यं भवतीत्यर्थः। फलकामनयापि ध्रुवाद्याराधनं यदा मोक्षदं तदा किं
वक्तव्यं भागवतधर्ममाहात्म्यं इति वक्तुं तत्संप्रदायप्रवर्तकत्वेनैव भगवंतं स्तौति। जितं
मिति॥१०॥ जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यं। निःकिंचना ये मुनय आ
त्मारामा यमुपासतेऽपवर्गाय॥१०॥ यदा भवान् भागवतं अनवद्यं धर्मं सनकादिभ्यः प्रा

ह्यातद्यद्देवभगवन्त्वया जितं। अनवद्यतामेवाह। निःकिंचनाइति॥५॥ विषममतिर्नयत्र
नृणां चमहमितिमेमतलवेति च यदत्यत्र। विषमधियारचितो यःसद्य विशुद्धः स्नायिस्नुरधर्म
बहुलस्तैः॥४२ विषममतिर्यत्र यस्मिन् भगवते धर्मे नास्ति। यदन्यत्र यथा अन्यस्मिन् काम्य
धर्मे विषममतिरस्ति। ननु सो पिवेदोक्तत्वात् अनवद्य एव। तत्राह॥ विषमधियाशास्तु मरणा
दिकामतया विरचितो विहितो यःसद्य विशुद्धः। रागद्वेषादिमत्वात् स्नायि स्नुश्च। नश्वरफ
लात्। तु अधर्मबहुलश्च हिंसाबाहुल्यात्। तदुक्तं शाबरस्वामिना। ऊनयमिहचोदनायां
लक्षते। अर्थो अनर्थश्च त्याद्येिएतस्य पंचयतिकइति॥६॥ कः स्तोमो निजपरयोः कियान

पत्र-
१३३

अपरकृताधर्मेणा॥ कुत्सेत् प्राज्ञवकोपः परसंधा इथा चतथाःधर्मा॥७॥ कृत्स्नेमाःतिं कृत्सालेन किंचित् निजपरयोः

र्थः स्वस्य परस्य च स्वपरद्रुहा। स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन। यतः स्वदेहाल
अत्पंतं कायक्लेशात् तत्र कोपः पीडासंभवति। तदुक्तंगीतासु॥ कर्शयंतःशरीरस्थं
तग्रामम चेतसः। मां चैवांतःशरीरस्थं तान् विध्यासुरनिश्चयान्॥ तथा परसंडीर्योधर्म
ःवत्राह्यान्नवकोपश्चा अतस्त्व यारागांधमपि कथं चिदिदमार्गप्रवर्त्तयित्रुकाम्यधर्मो
ऽपि दितो न तत्वदृष्ट्या भगवत धर्मेन तत्त्वोदस्त्यादानेति॥७॥ नत्र्यपि चरति तवेत्ता यथा
ग्रपिक्षितो भगवतो धर्मः स्थिरचरसत्वकदंबैषशृथक्षियो यस्तुपासतेत्वाचार्याः॥४३
नव्यपि चरति। नपरमार्थं जहाति। तवदीक्षा दृष्टिः। अव्यपिचारोदत्तः। स्थिरेति। स्थावर

पी श्र

ङ्गमप्राणिसुहृदेषु समदृष्टयो भागवता यं धर्ममाप्नुवंते। एवंभूतस्य भागवतधर्मप्रवर्त्तकस्य
तव दर्शनान्नृणां पापक्षयो भवतीति किं चित्रमित्याह। न हीति॥४४॥ न हि भगवन्नघटितमिदं त्वद्द
र्शनान्नृणामखिलपापक्षयः। यन्नाम सकृच्छ्रवणात्पुक्कसोपि विमुच्यते संसारात्॥४
४॥ तौ ह्यन्तःस्थोऽस्मीत्याह। अथेति॥४५॥ अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टा
शयमलाः सुरऋषिणा यत्कथितं तावकेन कथमन्यथा भवति। धपञ्चयोर्हेतोः तवाव
लोकेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते। त्वद्दर्शनं च मम श्रीनारदापादशानजात षटी· १३४
मित्याह। सुरऋषिणेति। यथा चाहं पूर्वं च तिष्ठतः मामापं। यथा च श्रीनारदेनानुशिष्टोहं।

नोस्मि तत्सर्वं तर्यामिणस्तव मया किं प्रकाशनीयमित्याह। विदितमिति॥४६॥ विदितमनंत समस्तं तव ज
गदात्मनो जनैरिहाचरितं। विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः। अथ वा विशेषेण
ज्ञाप्यं प्रकाशनीयं किं। न किमपीत्यर्थः। सवितुः श्रीसूर्यस्य यथा खद्योतैः प्रकाशनी
यं नास्ति तद्वत्। उक्तलक्षणं भगवंतं प्रणमति। नम इति द्वाभ्यां॥४७॥ नमस्तुभ्यं भगवते सक
लजगतः स्थितिलयोदयेशाय। दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय॥४७
सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय। दुरवसिता अविज्ञाता आत्मगतिः
निजं तत्त्वं यस्य तस्मै। केषां कुयोगिनां केन भिदा भेददृष्ट्या॥४७॥ यं वै श्वसंतमनु विश्वसृजः

श्वसंतियंवेकितानमनुचिंतयंत्यवकंति।भूमंडलंसर्षपायतियस्यमूर्ध्नितस्मैनमोभग
वतेस्तुसहस्रशीर्ष्णे।४८श्वसंतिचेष्टंते।येकिलानंतपरंतंअनुचिंतयन्तःज्ञानेंद्रियाणिग
च्छकंतिमाकुंठंपरंयंति।४।श्रीशुकउवाच।।संस्तुतोभगवानेवमनंतस्तमभाषत।विद्या
धरपतिंप्रीतःचित्रकेतुंकुरूद्वह।४९श्रीभगवानुवाच।।यन्नारदांगिरोभ्यांतेव्याहृतंमे
नुशासनं।संसिद्धोसितयाराजन्विद्ययादर्शनाच्चमे।५०अनुशासनंमद्विषयकउपदेशः
तेनचतयाचविद्ययाअस्मात्ममदर्शनात्संसिद्धोसि।तद्बोधदार्ढ्यायस्वयमुपदिशति।अ
हंवैसर्वभूतानिभूतात्माभूतभावनः।शब्दब्रह्मपरंब्रह्मममोभेशाश्वतीतनू।परसर्वभू

षटी·
१३५

तान्यहमेव।सोहंभोग्यात्मकंविश्वंमद्व्यतिरिक्तंनास्तीत्यर्थः।यतोहंभूतभावनः।भू
तानांप्रकाशकः।कारणंवा।ननुशब्दब्रह्मप्रकाशकंपरंब्रह्मप्रकाशरूपंकथंत्वमित्याह
तेउभेब्रह्मणीममैवरूपे।शाश्वतीशाश्वत्यौ।अतस्त्वमेवंपश्येत्याह।लोकेति।५१।लोके
विततमात्मानंलोकंचात्मनिसंततं।उभयंचमयाव्याप्तंमयिचैवोभयंकृतं।५२लोकेभो
ग्यप्रपंचेभोग्यत्वेनविततमनुगतमात्मानंलोकंचात्मनिभोग्यत्वेनसंततंव्याप्तंतदुभयं
चमयाकारणात्मनाव्याप्तं।मयिचैवोभयंकृतंकल्पितंतस्मादितितृतीयेनान्वयः।पश्येत्य
ध्याहारोवा।ननुजाग्रदाद्यवस्थादिभेदेनभोक्तृभोग्यात्मकंविश्वंस्फुटमेवप्रतीयमानं

कथं कल्पितं स्यादित्याशंक्य स्वप्नगतमैश्वर्यं दार्ष्टान्तिकत्वेनाह । यथेति ॥ ८ ॥ यथा
सुषुप्तौ पुरुषो विश्वं प्रपश्यतीत्यात्मनि । आत्मानमेकदेशस्थं मन्यते स्वप्नउत्थितः ॥ ९ ॥ यथा
स्वप्ने सुषुप्तौ विश्वं निखिलादिरूपं दृष्ट्वा तत्रस्थं आत्मन्येव पश्यति । स्वप्नमध्ये सुषुप्तिं स्वप्नं
वा पश्यतीत्यर्थः । तथा स्वप्नादुत्थितः सन् आत्मानं एकदेशस्थं शयनप्रदेशोस्थितं मन्यते ।
जाग्रदवस्थामनुभवतीति ॥ ९ ॥ एवं जागरणादीनि जीवस्थानानि चात्मनः । मायामात्राणि वि-
ज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ १० ॥ एवं प्रतिपाद्यापि जागरणादीनि जीवस्थानानि जीवोपाधेः बु-
द्धेरेवावस्था । आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां अवस्थात्रयाणां द्रष्टारं अत एव परं त- षटी· १३६

द्ववस्थारहितं आत्मानं स्मरेत् । ननु तेषां द्रष्टारमिति कथमुच्यते । स्वापे द्रष्टृभावे द्रष्टुर्वा-
भावात् । तत्राह येनेति ॥ ११ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा । सुखं च निर्गुणं ब्रह्म तमा-
त्मानमपि वेदा । सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां । प्रसुप्तः पुरुषो जीवत्वेन रूपेण
तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद । तमात्मानं ब्रह्म मां अवेहि । त-
दा स्वापसुखयोरसंवेदने सुखमहमस्वाप्समिति स्मृतेरसंभवात् । ननु स्वप्नमात्रेण प्राग्दृ-
न दृष्टं कथं जाग्रदवस्थो विश्वः स्मरेत् । न ह्यन्येन दृष्टं अन्यः स्मरतीत्यत्राह । उभयमिति ॥ १२ ॥
उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः । अन्वेति व्यतिरिच्येत तद्ज्ञानं ब्रह्म तत्परं । प्रस्व

नयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसंदधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाशावेतयद्भो
सिताभ्यां व्यतिरिच्येत । एकैकापायेप्यपायात् । तत्ज्ञानं परं ब्रह्म तदेव । ननु भिन्नमित्यर्थः ।
अतो बाल्ये दृष्टस्य यौवने स्मृतिवत् अवस्थांतरेपि स्वापानंदयोः स्मरणं घटत इति भावः । तदे
वं नूतं ब्रह्मात्मानमवेह्नीत्यनुखंगः । विपक्षे दोषमाह । यदेतमिति ॥ ८ ॥ यदेतद्विस्मृतं गुप्तोम
न्नावं भिन्नमात्मनः । ततः संसार एतस्य देहाद्देहो ष्टतेर्मृतिः । पूर्वं यत्वयद्दि एतन्मह्यावं मम स्वरूपं
ब्रह्म विस्मृतं । सदात्मनः सकाशात् भिन्नं भवति । ततु तदा एतस्य शुभंमनः संसारो भवति । संसरंस्पष्ट ष.टी.
स्पष्टमाह । देहाद्देहं जन्मानंतरं पुनर्जन्म । मृतेरनंतरं मृतिश्चेति । योन्यं नरेपि भोगाद्भिं पाद २३१

तं शाक्यं । ज्ञानार्थं त्वं नैव मनुष्याद्देहं प्राप्नोषि ततव्यमित्याह ॥ ८ ॥ लब्ध्वेह मानुषीं यो
निं ज्ञानविज्ञानसंभवां । आत्मानं यो न बुध्येत न क्वचिच्छममाप्नुयात् । पञ्ज्ञानं शास्त्री
कं विज्ञानमपरोक्षं तयोः संभवो यस्यां तां मानुषीं योनिं प्राप्य । इमं संसारादुपरमां ॥ ८ ॥ स्व
र्वेद्दाघां परिक्लेशं ततः फलविपर्ययं । तो भयं वाप्यनीहायां परपंस्प्रविरमेत्कवि । परमे ई
हायां प्रवृत्ति मार्गेऽनीहायां निवृत्तिमार्गे भयं मोक्षं भवतीति परपस्तफलसंकल्पादि
रमेत् । पागंतरे नो भयं परिक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वा वैराग्यमावहेत्
। एतदेव विवृणोति । सुखायेति त्रिभिः ॥ ८ ॥ सुखाय दुःखमोक्षाय कुर्वीत दंपती क्रि ।

याः॥ ततो निवृत्तिरिरश्या निर्दुःखस्य च सुखस्य च।६०दुःखस्यात्यनिवृत्तिःसुखस्यात्यप्राप्तिः।
ब॥ एवं विपर्ययं बुद्धा नृणां विज्ञाभिमानिनां। आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां।
६२ विज्ञाय तदात्मेन्त्रर्थोपार्जनिपुणा कथं इत्यभिमानवतां स्थानत्रयविलक्षणां तुरीयां बु
द्धा॥ब॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा। ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भ
वेत्॥६३ दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकैर्विषयैः स्वेन तेजसा विरक्तिविवेकबलेन न षटी· १३६
वात्तःपरःपुरुषार्थो ऽस्तीत्याह। एतावानिति।ब॥ एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः।
स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं।६५ योगेन नैपुण्यं यस्याः सा बुद्धिर्येषां परस्या।

त्मनः एकं दर्शनमिति यावत्। एतावानेव मनुजैः स्वार्थो ज्ञेयः।ब॥ त्वमेतच्छ्रद्धया राज
न्नप्रमत्तो वचो मम। ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि।६६ श्रीशुक उवाच। आ
श्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः। पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः।६७
इति श्रीभागवते महापुराणे षष्टस्कंधे संकर्षणस्तवो नाम षोडशोध्यायः॥ ॥ब॥ ॥त
तः सप्तदशोमोघमदर्धिं प्राप्यैव वरनविद्दस्य गिरिशं ग्रापा तद्रुमायाः स्तवं तां गतः।ब॥ श्री
शुक उवाच॥ यतश्चान्तर्हितोनंतस्तस्यै कृत्वा दिशे नमः। विद्याधरश्चित्रकेतुश्चचार
गगनेचरः।२ यतः यस्यां दिशि तस्यै दिशे नमः। तमनं कृत्वा स विद्याधरः स्त्रीभिः संहृहरि

गायन्रेमे द्वयोरव्ययः॥१॥ स लक्षं वर्षलक्षाणां अव्याहतबलेंद्रियः स्तूयमानो महायो
गी मुनिभिः सिद्धचारणैः॥ २ अव्याहतं इंद्रियपाटवं यस्य॥२॥ कुलाचलेंद्रद्रोणीषु ना
नासंकल्पसिद्धिषु रेमे विद्याधरस्त्रीभिः गापयन्हरिमीश्वरं। ३ नानासंकल्पेव सिद्धयो
यासु॥३॥ अकस्मादद्भुतैश्वर्यगर्वात्प्रारब्धकर्मतः। आसुरीयोनिमापन्नेभवानीशापतः
कुतो ४ तदेवाह एकदेति॥४॥ एकदा स विमानेन विष्णुदत्तेन भास्वता। गिरिशं ददृशे ग
च्छन्परीतं सिद्धचारणैः॥ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि उपेत्य वावदद्देव्या
शृण्वत्या जहासोच्चैस्तदंतिके॥५॥ अंकीकृतां उत्संगे नीतां अल्पदेवीं बाहुना लिंगप्यि षटी. १३०

ष्ठितं दृष्ट्वा उच्चैर्जहास उवाच च॥६॥ चित्रकेतुरुवाच॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरी
रिणां। आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया। इदं शरीरिणां धर्मवक्ता यः सभायां मु
ख्यः स एष। अहो धर्मिष्टता। यो मुनिसभायां मुख्यः स भार्यया मिथुनीभूय आस्ते॥७॥ ज
टाधरस्तीव्रतपा ब्रह्मवादिसभापतिः। अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा
। ७ यो जटाधरस्तीव्रतपा स्त्रियमंकीकृत्यास्ते अहो आश्चर्यं॥८॥ प्रायशः प्राकृताश्चा
पि स्त्रियं रहसि बिभ्रति। अयं महाव्रतधरो बिभर्त्ति सदसि स्त्रियं॥९॥ भगवानपि तच्छ्रुत्वा
प्रहस्यागाधधीर्नृप। तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः॥१०॥ अगाधा गंभीरा धीर्य

स्यमद्रक्षोबभूव॥७॥श्रीशुक उ०॥इत्यतद्वीर्यविदुषिब्रुवाणेबकुशोमतंरुषाहदेवीधृ
ष्टायनिर्जितात्माभिमानिने॥९॥नतस्यवीर्यंप्रभावंविदानस्यतद्वीर्यविदानत्तस्मिन्निर्जि
तात्माभिमानिनेजितेंद्रियोद्दमित्यभिमानवतोऽतिरुषाक्रोधेनाह॥७॥पार्वत्युवाच
॥अयंकिमधुनालोकेशास्तादंडधरःप्रभुः॥अस्मद्विधानांदुष्टानांनिर्लज्जानांचविप्र
कृत॥१०॥विरुद्धंदंडंप्रकार्षेणकरोतीतिविप्रियकृत॥७॥नवेदधर्मंकिलपद्मयोनि
र्नब्रह्मपुत्राभृगुनारदाद्या॥नविकुमारःकपिलोमनुश्चयेनोनिषेधंत्यतिवर्त्तिनंहरं॥ ष.टी. १४०
॥११॥अतिवर्त्तिनंशास्त्रमतिक्रम्यवर्त्तमानंशीलंयेनोनिषेधंतिनवारयंति॥७॥एषाम

मंग१

मनुध्येयपदाब्जयुग्मंजगद्गुरुंमंगलंस्वयं॥यःस्वात्रबंधुःपरिभूयसूरीन्प्रशास्तिदुष्टस्तु
दयदिदंच॥१३॥यांब्रह्मादीनांअनुध्येयंचरणकमलंयस्यतं।मंगलंमंगलंपरमधर्मसूरि
स्सूरीन्नारदादीन्परिभूयअज्ञानस्त्वाजगद्गुरुंश्रीमहादेवंयःप्रशास्तितनस्माद्दुष्टं
ननुदृरिपक्षोयंनदंडार्हइतिचेत्तत्राह॥७॥नायमर्हतिवैकुंठपादमूलोपसर्पणं॥संभा
वितमतिस्तब्धःसाधुभिःपर्युपासितं॥१४॥नायंसाधुभिःपरिसेवितंवैकुंठस्यपादमूलोप
सर्पणंअर्हति॥यतःसंभावितात्माअहंकारी॥७॥अतःपापीयसीयोनिमासुरीयाहि॥दु
र्मत॥यथेहभूयोमहतांनकर्त्तापुत्रकिल्बिषं॥१५॥इहकुत्रयथाभूयःमहतांकिल्बिषमवेग

एतां न कल्पितत्वाच्छ्रुतीयो तिं यादीत्यर्थः ॥ श्रीशुक उवाच ॥ एवं शप्तश्चित्रकेतुर्विमा
नादवरुह्य सः । प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ।१६ सती त्स्वतं श्री । रुद्रपार्यां ॥
चित्रकेतुरुवाच ॥ प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनांबिके । देवैर्मर्त्याय यत्प्रोक्तं पूर्वदि
ष्टं हि तस्य तत् ।१७ पूर्वदिष्टं प्राचीनकर्मोत्थमेव । अयं च संसारचक्रस्वभाव एव न चित्रमि
त्याह ॥ संसारचक्र एतस्मिन्जन्तुरज्ञानमोहितः । भ्रमन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा पटी- १४२
।१८ अत एवात्र मम च तव च न दोष इत्याह ॥ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयो
। कर्तारं मन्यतेऽप्राज्ञः आत्मानं परमेव च ।१९ एवं तावत्सुखदुःखादिकमंगीकृत्योक्तं

इदानीं तदपि वस्तुतो नास्तीत्याह गुण इति ॥ गुणप्रवाह एतस्मिन्कः शापः को न्वनु
ग्रहः । कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ।२० गुणानां मायामयानां प्रवाहे
संसारे । ननु मायागुणानां चेदयं प्रवाहस्तर्हि तेषां जडत्वात् बंधमोक्षाद्यनुभवो न स्या
त् । तत्राह ॥ एकः सृजति भूतानि भगवानात्ममायया । एषां बंधं च मोक्षं च सुखं दुःखं
च निष्कलः ।२१ एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति । एषां
भूतानां बंधादिकं च सृजति । निष्कलः स्वयं बंधादिशून्यः । नन्वेवं भूतविषमसृष्टौ तस्य
किं कारणं प्रियाप्रियवैषम्याभावात् । इत्याशंक्य यद्यपि प्रियादयो न संति तथापि त

कर्मवशात्तत्सर्वं घटते स्याद्द्वाभ्यां। मतस्येति।।७।। ततस्य कश्चिद्दयितः प्रतीपो न ज्ञाति
बंधुर्न परो न तस्यैवं।। समस्य सर्वत्र निरंजनस्य सुखेन रागः कुत एव रोषः।।२२ प्रतीपः शत्रुः प्रि
यः न ज्ञाति बंधुर्वा। तत्र हेतुः। सर्वत्र समस्य। कुतः निरंजनस्य। निःसंगस्य। अत एव तन्नि
मित्ते सुखे रागो नास्ति रागानुबंधो रोषः कथं स्यात्।।८।। तथापि तच्छक्ति विसर्ग एषां सुखा
य दुःखाय हिताहिताय। बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतये च कल्प्यते।।२
३।। यद्यप्येवं तथापि तस्य शक्त्या मायया योऽयं विसर्गः जगत्सृष्टिः। प्राणिकर्मानुरूपतया एतस्य
[illegible]या विसर्गो जगत्सृष्टिर्भवति। प्राणिनां कर्मानुसारेण सुखादि कल्पते।।९।। अथ प्रम

षटी. १४२

न्दयेन वां शापमोक्षाय मानिनि। यन्मन्यसे ह्यसाध्वुक्तं मम तत्क्षम्यतां सति।।२५।। अथ तस्मात्
दृष्टानि निन्द्येको पते च्चांके वलं प्रसादयेन तु शापमोक्षाय। न तु हि किं प्रसादनेन। अत आह।।
मयोक्तं साध्वपि यद्दिक्ष्यसाधु मत्पसे तत् त्वया क्षम्यतां।।१०।। श्रीशुक उ०। इति प्रसाद्य गिरि
शौ चित्रकेतुररिंदम। जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः।।२६ गिरिशौ भवानी
शंकरौ प्रसाद्य स्मयतोः विस्मयं कुर्वतोः सतोः भवानीशंकरयोः स्वविमानेन जगाम।
११।। ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत्। देवर्षिदैत्यसंघानां पार्षदानां च शृण्व
तां।।२७ श्रीमहादेव उवाच।। दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः। माहात्म्यं भृत्यभृ

त्मानां निःस्पृहाणां महात्मनां ॥ २७ ॥ नारायणपराः सर्वे बिभ्यंति न कुतश्चन । स्वर्गाप-
वर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥ स्वर्गादिष्वेव तुल्योर्थः प्रयोजनमिति द्रष्टुं शीलं येषां
ते तथा । तत्र तदुक्तमेव दृष्टमाह द्वाभ्यां । देहिनामिति ॥ देहिनां देहसंयोगात् द्वंद्वानी-
श्वरमायया । सुखं दुःखं मृतिर्जन्म शापोनुग्रह एव च ॥ २९ ॥ देहिनां सुखदुःखमित्यादि द्वं-
द्वानि ईश्वरस्य मायया भवंति ॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि । गुणदोष- षष्ठ· १४३
विकल्पश्च भिदेव स्रजिवत्कृतः ॥ ३० ॥ तत्र गुणदोषविकल्पः इत्येवेत्यन्वयः । इष्टानिष्टे-
द्वयः स्फुरति आत्मन्यर्थभेदः शुभादिभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति ।

स्रजि सर्पमालादिभिदा यथा । तथैव कृत इत्यर्थः । अतो भागवतानां निस्पृहत्वमु-
चितमेवेत्याह । वासुदेवेति ॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणां । ज्ञानवैराग्य-
वीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥ ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्यपाश्रयः वि-
शिष्टबुध्याश्रयणीयोर्थो नास्ति ॥ अस्मद्वद्धरिदासत्वेन तत्त्वज्ञानवत्त्वात् तेन तद्विचित्रमिति
वक्तुं हरेर्माहात्म्यमाह । नाहमिति ॥ नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः
सुरेशाः । विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥ ईहितम-
भिप्रायं लीलां वा । यदा वयं न विद्मः तदा तस्य स्वरूपं अंशकांशकाः संतोपि पृथक्कु

श्मानिनो न विद्विषा॥३२॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा। आत्मत्वात्सर्व
भूतानां सर्वभूतप्रियो हरिः॥३३॥ अत एव हरिरपि सर्वेषां भूतानां प्रियः अहं चैवाच्युतस्यापि प्रि
यः तस्मान्ममास्मिन्क्रोधो नाभूदिति भावः॥ ॥ तस्य चायं महाभागश्चित्रकेतुः प्रियोनुगः
सर्वत्र समदृक्शान्तो ह्यहं चैवाच्युतप्रियः॥३४॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महा
त्मसु। महापुरुषभक्तेषु शान्तेषु समदर्शिषु॥३५॥ श्रीशुक उ०॥ इति श्रुत्वा भगवतः शिव
स्योमाभिभाषितं। बभूव शान्तधी राजन्देवी विगतविस्मया॥३६॥ इति भागवतो देव्याः प्रतिश षट्·
प्तुमलंतमः। मूर्ध्ना स जगृहे शापमेतावत्साधुलक्षणं॥३७॥ प्रतिशप्तुं प्रतिशापं दातुं अलंतं २४४

मः अतिसमर्थोपि शापं न ददौ। प्रत्युत तस्याः शापं मूर्ध्ना जगृहे। साधुलक्षणं एतावदे
व॥ ॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ आसुरीं योनिमाश्रितः। वृत्र इत्यभिविख्यातो ज्ञानविज्ञान
संयुतः॥३८॥ श्रीशुक उ०॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि। वृत्रस्यासुरजातेश्च का
रणं भगवन्मतेः॥३९॥ आसुरजातेः असुरस्वभावेनोत्पन्नेः भगवति मतश्च एतत्सर्वमा
ख्यातं॥ ॥ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः। माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधा
द्विमुच्यते॥४०॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् इतिहासं हरिं स्मृत्वा स याति
परमां गतिं॥४१॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रोत्पत्तेः कारणं नाम स

न्दशोध्यायः॥ ॥६०॥ ॥आदित्यानां चतुर्थस्य वैवस्वतवंशप्रसंगतः। प्रोक्तमिदं कृतं विश्व
रूपवृत्रवधादिकं। अदितेः पंचमादीनां पुत्राणामन्वयोक्तितः। अष्टादशे द्विते गर्गेशाके
णमरुतां मिदा॥ वैष्णुवंशमनुक्रम्यमत्रसंगं यथाक्रमं। आदित्यानामथान्येषां वंशोनाद
मुनीश्वरः। दक्षकन्यान्वयानुकथ्यते अदित्याः द्वादशपुत्राः प्रोक्ताः। विवस्वानर्यमा पूषा त्व
ष्टाथ सविता भगः धाता विधाता वरुणो मित्रः शक्र उरुक्रमः इति। तत्राष्टाध्यायमारभ्य। षष्टी· २४५
रा.. विश्वरूपवृत्रचित्रकेतुरव्याने वैष्णुवंशमनुवर्ण्य इदानीं सवितुर्वंशमाहाष्टादशाध्याये॥
श्रीशुक उवाच॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीं अग्निहोत्रं पशुं सोमं चातुर्मा

स्यं महामखान्॥१॥ सावित्रीमित्यादि अवहेतेनस्तुतस्यानुषंगः पशुं पशुयागं। महामखान्
पंचयज्ञान्॥१॥ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं। आशिषं च वरारोहां कन्यां प्रासूत
सुव्रतां॥२॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा। सायं दर्शमथ प्रातः पूर्णमासमनु
क्रमात्॥३॥ धातुर्भार्याः कुहूः सिनीवाली राका अनुमतिश्चतुरो भार्याः। कुहूः सायं पु
त्रं प्रासूत। सिनीवाली दर्शं। राका प्रातर्नामानं। अनुमतिः पूर्णमासं॥३॥ अग्नीन्पु
रीष्यानाधत्त क्रियायां समनंतरः। चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः॥ समन
नंतरो विधाता क्रियायां भार्यायां पुरीष्यादीनग्नीन् पंच वित्तीः पुरीष्यासोप्यग्नयः इति। पं

चवाएतेअमयोयश्चितयइतिचक्षुते:।चर्षणीवरुणस्यभार्यायस्यांभृगुःसुतोजातः।
पूर्वंब्रह्मणःपुत्रोभृगुःयस्यांपुनर्जातोमन्वंतरांतरे।७।।वाल्मीकिश्चमहायोगीवल्मीका
द्भवकिल।अगस्त्यश्चवसिष्ठश्चमित्रावरुणयोरृषी।।५वाल्मीकिःवरुणस्यैवपुत्रोभव
त्।तयोरेवसाधारणौद्वौपुत्रौवाच्यौ।अगस्त्यश्चवशिष्ठश्चऋषीमित्रावरुणयोरभवतां।य
तःउभावपिकुंभेरेतःसिषिचतुः।तदाह।७।रेतःसिषिचतुःकुंभेउर्वश्याःसंनिधौद्रु ष·टी· २४६
तं।रेवत्यांमित्रउत्सर्गमरिष्टंपिप्पलंव्यधात्।१८उर्वशीदर्शनात्तुतेस्कन्नं।७।पौलोम
म्यामिंद्रआधत्तत्रीन्पुत्रानितिनःश्रुतं।जयंतमृषभंतातततृतीयंमीढुषंप्रभुः।१९ऋक्ष।

मस्यदेवस्यमायावामनरूपिणःकीर्तौपत्न्यांबृहच्छ्लोकस्तस्यासन्सौभगादयः।७तस्य
बृहच्छ्लोकस्यसौभगादयःपुत्राः।७।।तत्कर्मगुणवीर्याणिकाश्यपस्यमहात्मनः।पश्चा
द्वक्ष्यामहेऽदित्यांयथैवावततारह।१८पश्चात्अष्टमस्कंधे।७।।अथकश्यपदायादान्
दैतेयान्कीर्तयामिते।यत्रभागवतःश्रीमान्बलिःप्रह्लादएवच।२०दितेर्द्वावेवदाया
दौदैत्यदानववंदितौ।हिरण्यकशिपुर्नामहिरण्याक्षश्चकीर्तितौ।२१हिरण्यकशिपु
र्हिरण्याक्षश्चेतिप्रथमंतृतीयस्कंधेद्वावेवकीर्तितौ।७।।हिरण्यकशिपोर्भार्याकया
धुर्नामदानवी।जंभस्यतनयासातुसुषुवेचतुरःसुतान्।२२अनुह्रादंसंह्रादंह्रादंप्र

२ कादमेवच। तस्य मा पिंडिकानाम राज्ञे विप्रवितोर्इंदीत ॥१२॥ विप्रवितोदानवात्मा पिं
डिकाराज्ञं उवाच मयदीक्षितुं वा ॥७॥ शिरोदरं घस्पद्रस्थकेण पिबतोमृतं। संक्रादस्य च
निर्जार्यामृतपं कज्ज नंततः ॥१४॥ ततः संक्रादोतृप्तिः पंचजनं प्रउवत्रस्तौ ॥७॥ क्रादस्यधम
निर्जार्यामृतवानापि मिष्वलं। योगस्मायवतिथये पेचेवानापि मिष्वलः ॥१५॥ योमेषस्वयं
वानापिं पेचयोस्वलः ॥७॥ अनुक्रादस्तु सूर्म्यायां बाष्कलो महिषस्तथा। विरोचनस्तु प्रा षटी.
क्रादिः देव्यां तस्मात्वबलिः ॥१६॥ बाणज्येष्ठं उवत्रशतमशानायांततोभवत्। तस्यानुजावसु १७७
श्लोकयपश्चाद्देवापि धाम्यते ॥१७॥ ततो बलेः सुकाशात्तु बाणज्येष्ठं उवत्रशतमभवत्। तस्यब

लेस्तु श्लोको गुणकीर्त्यद्धिमहिमा पश्चात्तत्राष्टमस्कंधे। यथाअनुजामनेत्र ज्ञिःस्तु यत्
इत्यनुजावंशश्लोकं यत्राइति ॥ग्रीष ॥७॥ बाणश्चाराध्यगिरिशं लेभेतत्गणमुख्यतां।
यस्यार्श्वभगवानास्ते ह्यापि पुरपालकः ॥१८॥ तस्यश्रीमहादेवस्य गणेषु मुख्यतां प्राधा
न्यां ॥७॥ मरुतश्च दितेः पुत्राः चत्वारिंशन्नवाधिकाः। तत्र आसन् प्रजाः सर्वे नीता इंद्रेण सात्म
तां ॥१९॥ सात्मतां समानरूपतां। देवत्वं प्रापितास्त्यर्थः ॥७॥ राजोवाच। कथंतत्रासुरंभाव
उपोह्योत्पत्तिकं गुरो। इंद्रेण प्रापितासात्म्यं किं तत्साधुकृतं हितैः ॥२०॥ समेश्रद्धधते ब्रह्मन्
ऋषयो हि मयासहाः परिज्ञानाय भगवन् तन्नो व्याख्यातुमर्हसि ॥२१॥ ततउवाच। इति विष्णु।

रातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत् । सभाजयन् संनिभृतेन चेतसा ज-
गाद सत्रायण सर्वदर्शनः ॥ २२ ॥ आदृतं सादरं यथा भवति तथा ॥ अल्पं मिताक्षरं अर्थवत् ब-
ह्वर्थयुतं । सत्रमयनमाश्रयो यस्य हे सत्रायण शौनक ॥ ७ ॥ श्रीशुक उवाच ॥ हतपुत्रा दिति-
ः शक्रपार्ष्णिग्राहेण विष्णुना मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिंतयत् ॥ २३ ॥ पार्ष्णिग्राहेण
पृष्ठतः सहायेन ॥ ७ ॥ कदाहं भ्रातृहंतारं इंद्रियाराममुल्बणं । अक्लिन्नहृदयं पापं घातयित्वा
शये सुखं ॥ २४ ॥ उल्बणं क्रूरं । अक्लिन्नहृदयं कठिनं चित्तं ननु राजा स्वदेहरक्षार्थं अन्येषां घातं
करोत्येव । किमत्र चित्रं तत्राह ॥ ७ ॥ कृमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च । भूतध्रुक्

षटी·
२६८

सु किं स्वार्थं वेद । न वेदैवेत्यर्थः । तत्र हेतुत्यतो तत्कृते स्वार्थं किं वेद निरयो यतः ॥ २५ ॥ ई-
शः प्रभुः इत्यभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानंतरं क्वचिद्दिनावस्थितस्य कृ-
मय इति । श्वादिभिर्भक्षितस्य विष्ठेति । दग्धस्य भस्मेति संज्ञा । तत्कृते तस्य देहस्य कृते यो भू-
तध्रुक् कृतः किं स्वार्थं वेद । न वेदैवेत्यर्थः । तत्र हेतुः यतो भूतद्रोहात् निरयो भवति ॥ ७ ॥ आशा-
सानस्य तस्येदं ध्रुवमुन्नद्धचेतसः । मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥ इदं देहादि-
कं ध्रुवं नित्यं आशासानस्य मन्यमानस्य अतः उन्नद्धं उच्छृंखलं चेतो यस्य । तस्येंद्रस्य याम-
दः तस्य शोषकः पुत्रो मे येन हेतुना भूयात् तं भवेत ॥ ७ ॥ इति भावेन सा पर्यचिंत्यापचारा सम-

स्त्रियं। शुश्रूषयानुरागेण प्रश्रयेण दमेन च।२७ भर्तुः प्रिया चरणमेवेति भावेन सा भर्तुः।
प्रियमसत्त्वदाचचार॥७॥ सत्यापरमयाराजन मतो हैर्वल्गुभाषितैः। मनोज्ञयाह्लाव
ज्ञास्तु स्मितापांगवीक्षणैः॥२८॥ एवं स्त्रियाजडीभूतो विद्वानपि विदग्धया बाढमित्येव विव
शोनतस्त्रियं स्त्रियोषिति।२९ विवशः स्त्रीपरतंत्रः सन्न बाढं तव मनोरथं पूरयिष्यामी त्यंगीवि
कारानतस्त्रियं प्रति देवमाह॥७॥ त्रिलोकैः कांमभूतानि भूतान्यादौ प्रजापतिः। स्त्रियं चक्रे स्व षटी.
देहार्द्धं यया पुंसां मतिर्हृता।३०। कांतभुतानि निःसंगानि पिशुनेनत्पृष्टिः स्वार्थं स्वदेह २४९
र्द्धमेव स्त्रियं चक्रे। एवं स्त्रियाशुश्रूषितः॥७॥ एवं शुश्रूषितस्तातभगवान् कश्यपस्तया। प्रस

न्नः परमप्रीतो दितिमाह्लादिनं ह्य च।३१ कश्यप उवाच॥ वरं वरय वामोरु प्रीतस्तेहमनिं
दिते। स्त्रियो भर्त्तरि सुप्रीते कः कामस्त्वागमः।३२ इहच कारात् परत्र च स्वर्गमस्त्रप्राप्य
ः कः कामः। नकोपी तिभावः॥७॥ ~~पतिभाव ः॥७॥~~ पतिरेव हि नारीणां देवतं परमं स्मृतं। म
नसः सर्वभूतानां वासुदेवः श्रियः पतिः।३३ परमं दैवतं देवता। न तु परामश्वरे सुप्रीते स
र्वकामप्राप्तिरिति प्रसिद्धं। सत्यं। स एवस्वाधिकारेण रूपभेदैः प्रजुपतइत्याह्व। मानसइति
॥७॥ स एव देवतालिंगैर्नामरूपविकल्पितैः। इज्यते भगवान् पुंभिः स्त्रीभिश्च पतिरूपधृ
क्।३४ देवानां लिंगैर्मूर्तिभिः उपलक्षितः। तान्येवाह्व। नामइंद्रादि। रूपं वज्रहस्तचादि

र्तव्यां विविधं कल्पितैः ।३३। तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे । यजंतेनन्यभा
वेन पतिमात्मानमीश्वरं ।३४। सोहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः । तं ते संपादये का
ममसतीनां सुदुर्लभं ।३५। दितिरुवाच ।। वरदो यदि मे ब्रह्मन् पुत्रमिंद्रहणं वृणे । अमृतं मृ
तपुत्राहं येन मे घातितौ सुतौ ।३६। इंद्रहणं इंद्रहंतारं । अमृतं मृत्युशून्यं । येन इंद्रेण विष्णु
तामसद्या येन घातितौ मे सुतौ ।३६। निशम्य तद्वचो विप्रो विमना पर्यतप्यत । अहो अधर्मः
सुमहानद्य मे समुपस्थितः ।३७। अहो अर्थेंद्रियारामो योषिन्मय्येह मायया । गृहीतचेताः षटी· २५०
कृपणः पतिष्ये नरके ध्रुवं ।३८। कोतिक्रमोनुवर्तंत्याः स्वभावमिह योषितः । धिङ्मां बताबुधं

स्वार्थे यदहं त्वजितेंद्रियः ।३९। स्वभावमनुवर्तमानायाः योषितः कोतिक्रमः कोपराधः । मा
मेवाधिक् । कथंभूतं मां स्वार्थे अबुधं यतः अजितेंद्रियः । स्वभावमेवाह द्वाभ्यां । शरदिति ।३९।
शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं । हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितं ।४०। शरत्का
लीनपद्मस्येव उत्सवो विकाशो यस्मिन् वक्त्रे । वचश्च श्रवणामृतं । क्षुरधारोपमं तीक्ष्णं चित्तं
यस्याः तस्याश्चेष्टितं को वेद ।४०। न हि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनां । पतिं पु
त्रं भ्रातरं वापि घ्नंत्यर्थे घातयंति च ।४१। स्वाशिषात्मनां स्वार्थैकामनया आत्मवत्प्रेष्ठत्वेन प्र
तीयमानानां ।४१। प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् । वधं नार्हति चेंद्रोपि तत्रेदमुप

कल्प्यते। धर्मउपकल्पते। इदं कर्त्तव्यमित्यर्थः॥७॥ इति संचिंत्य भगवान् मारीचः कुरुनंदन
॥उवाच किं चिंतु पितः आत्मानं च विगर्हयन्॥७४॥ अयं भावः॥ वेष्ठवंकृतं तावदुपदेष्टा मि
। तेनैवास्याः शुद्धचित्तायाः इंद्रेक्रोधो निर्वापयिष्यते॥ पुत्रस्त्वमर्त्यो न विष्यति॥ दीर्घकालस्य व्र
तस्य कथं विधिहीनेपि सतीन्द्रस्य वधो न भविष्यतीति संचिंत्य उवाच॥७॥ पुत्रस्ते न विता भवे
इंद्रहा दैवबांधवः॥ यं वत्सरं व्रतमिदं यद्यंगो धारयिष्यसि॥७६॥ देवि यथावत्पदि धार
यिष्यसीति वैष्णवव्रताद्भुतस्य कथं विधिहीनेपि सति पर्वस्या वैफल्याभावात्॥७॥ इतिरूवा ष.टी. १५२
व॥ धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे॥ यानि चेह निषिद्धानि न व्रतं घ्नंति यानि तु

॥७७॥ कार्याण्यावश्यकानि। न च निषिद्धानि। किंत्वनुज्ञातानि। तानि सर्वाणि ब्रूहीति। न
वैव त्रिंशान्निषेधानाह॥७॥ कश्यप उवाच॥ न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत्॥ न छिंद्या
न्नखरोमाणि न स्पृशेद्यदमंगलं॥७८॥ न शापेन्नाक्रोशेत् यदमंगलं कपालास्थ्यादिकं न
स्पृशेत्॥७॥ नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः॥ न वसीत।धौतवासः स्रजं च विधृतां।
क्वचित्॥७९॥ अप्सु प्रविश्य न स्नायात्। पूर्वं विधृतां स्रजं पुनर्न धारयेत्। भोजने पंच निषेधा
नाह॥ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतं॥ भुंजीत दक्षयादृष्टं पिबेदंजलिनाप्य
पः॥८०॥ चंडिकान्नं भद्रकाल्यै निवेदितं। सामिषं पिपीलिकादूषितं। अंजलिनाप्यपः न पिबे

त।उदक्ययारजस्वलया।इहाबहिर्निर्गमेसन्ननिषेधनाद्।६।नोच्छिष्टोस्पृष्टसलिल
संध्यायांमुक्तमूर्द्धजा।अनर्चितासंयतवाङ्नासंवीताबहिश्चरेत्।पश्चात्अनर्चितामंडनही
नाअसंवीताअप्रक्षालितमस्तकाउक्तमूर्द्धजा।मुक्तकेशा।शयनेष्टोनिषेधनाद्।७।नाधौत
पादाप्रयतानार्द्रपान्नउदक्शिरा।शयीततनापराक्नात्पे:ननग्नानचसंध्ययो:।प०नाप
राक्पश्चिमशिरा।कार्याण्याह।धौतवासेतिवाक्यां।८।धौतवासाश्शुचिर्नित्यंसर्वमंगलसंयुता
।पूजयेत्प्रातराशात्प्राक्गोविप्रान्प्रियमच्युतं।पश्चात्प्रातराशात्प्रथमभोजनात्पूर्वं।९।स्त्रिये
वीरवतीश्चार्चेत्स्वगंधबलिमंडनैः।पतिंवाच्योपतिष्ठेतध्यायेत्कोष्टागतंचतं।प०वीरवती।। षटी· १५२

जीवद्भर्तृकासमुत्ताच।पतिंअर्च्यसंपूज्य।कोष्टगतंकुक्षेरंतर्गतंतंपतिंध्यायेत्।१०।संवत्सरं
हुंसवतंव्रतमेतदविप्लुतं।धारयेद्यपिवेत्तुल्यंब्राक्कृद्दाभवितासुत:।प०घुंसवनंपुत्रोत्पत्ति
करं।तुल्यंसवा।११।बाढमित्यस्तुपेयाथदितीराजन्महामना।काश्यपंगर्भमाधत्तव्रतंवांजे
दधारसा।प०मातृष्वसुरभिप्रायंइंद्रआज्ञायमानदा।शुश्रूषणेनाश्रमस्थांदितिंपर्यचरत्कृ
वि:।प०कविःस्वकार्यसाधनेदक्षा।१२।नित्यंवनात्सुमन:फलपुष्पमूलसमित्कुशाद्ग्नातू।पत्रांकु षटी· १५३
रमृदापश्चकालेकालउपाहरत्।प०एवंतेस्या:व्रतस्थाया:व्रतछिद्रंहरिर्नृपाप्रैक्षत्प
र्यवरजिह्मोमृगहेवमृगाकृति:।प०हरिंद्र:व्रतस्यछिद्रंप्रेप्सु:प्राप्तुमिच्छु:जिह्म:कुवि

लः।साधुवेषः।तृणदास्तुष्टकोयथातृणवर्तंनामतृणवेषोत्रवतितद्वत्।ठ।नाध्यगछन्त
तच्छिद्रंतत्परोथमहीपते।चिंतांतीव्रांगतःशक्रःकेनमेस्याच्छिवंत्विह।९।केनमेशिवंस्या
दितिचिंतांप्राप्तः।ठ।एकदासातुसंध्यायामुच्छिष्टाव्रतकर्शिता।अस्पृष्ट्वार्द्रधौतांघ्रिः
सुषापविधिमोहिता।१०अस्पृष्ट्वारिश्चासावधौतांघ्रिश्चसुषापतत्रापिसंध्यायां।ठ।ल
ब्धातदंतरंशक्रोनिद्रोपहृतचेतसः।दितेःप्रविश्यउदरंयोगेशोयोगमायया।११निद्रयापहृ
तंचेतोयस्याःतस्याः।ठ।चकर्तसप्तधागर्भंवज्रेणकनकप्रभं।रुदंतंसप्तधैकैकंमा
रोदीरितितान्पुनः।१२मारोदीरितिपुत्रान्लालयन्निव।पुनस्तान्सप्तधाचकर्तविच्छेद्य।ठ।तेनसु

षटी·
१५३

चुःपाट्यमानासर्वेप्रांजलयोनृप।नोजिघांससिकिंइंद्रभ्रातरोमरुतस्तव।१३मापैष्टभ्रा
तरोमह्यंयूयमित्याहकौशिकः।अनन्यभावान्पार्षदांश्चआत्मनोमरुतांगणान्।१४कौशि
कःइंद्रः।गणान्सप्तसप्तगणावैमरुतइतिश्रुतेः।ठ।नममारदितेर्गर्भःश्रीनिवासानुकं
पया।बहुधाकुलिशक्षुण्णोद्रौण्यस्त्रेणयथाभवान्।१५सकृदिष्ट्वादिपुरुषंपुरुषोयातित
त्साम्यतां।संवत्सरंकिंचिदूनंदित्यायद्धरिरर्चितः।१६सजूरिंद्रेणपंचाशद्देवास्तेमरुतोभव
न्।व्यपोह्यमातृदोषंतेहरिणासोमपाःकृताः।१७सजूःसहेत्यर्थः।हरिणाइंद्रेणसहापि
पोशात्मकृष्णाअभवन्।ठ।दितिरुत्थायददृशेकुमाराननलप्रभान्।इंद्रेणसहितान्

देवीपर्यन्तुष्यदतंदिता।८८।अथेंद्रमाहूतानादमादित्यानांमयावदंअपत्यमिछत्यपवरंव्रतमे
तस्तुडंःकरं।८९।एकःसंकल्पितःपुत्रःसप्तसप्ताभवन्कथं।यदितेविदितंशक्रसत्यंकथयमा
मृषा।९०।दित्यानिःकपटस्तुक्कैसातिंद्रोपिनिःकपटमेवादः।७।इंद्रउवाच।।अंबतेहंव्यवसि
तमुपधार्यागतोंतिकं।लब्धांतरोछिदंगर्भंअर्थबुद्धिर्नधर्मवित्।९१।लब्धमंतरंछिद्रंयेन।ते
नमया।अर्थेएवबुद्धिर्यस्यनतुधर्मे।७।कृत्तोमेसप्तधागर्भःआसन्सप्तकुमारकाः।तेपिचै
कैकशोवृक्णाः।सप्तधानापिमम्रिरे।९२।ततस्तत्परमाश्चर्यंवीक्ष्यव्यवसितंमया।महापुरुष षटी. १५७
पूजायाःसिद्धिःकाप्यनुषंगिणी।९३।कापिश्चनिर्वचनीयासिद्धिः।७।आराधनंभगवतः

ईहमानानिराशिषः।येतुनेछंत्यपिपरंतेस्वार्थकुशलाःस्मृताः।९४।परंमोक्षमपियेनइ
छंतितएवनान्ये।७।आराध्यात्मप्रदंदेवंआत्मानंजगदीश्वरं।कोवृणीतगुणस्पर्शंबुधः
स्यान्नरकेपियत्।९५।गुणस्पर्शंविषयभोगंबुधश्चेनर्दिकिंवृणीत।यत्यस्मात्विषयभोग
निरयेसंसारेपिस्यात्।७।तदिदंममदौर्जन्यंबालिशस्यमहीयसि।क्षंतुमर्हसिमातस्त्वंदि
ष्ट्यागर्भोमृतोत्थितः।९६।दैवेमदीयमिमंदत्तंमे।मृतःसन्गर्भःउत्थितःएतद्दिष्ट्यासंजातं
मित्यर्थः।७।श्रीशुकउवाच।।इंद्रस्तयाभ्यनुज्ञातःशुद्धभावेनतुष्टया।मरुद्भिःसहतान्
पं. त्वाजगामत्रिदिवंप्रभुः।९७।एवंतेसर्वमाख्यातंयन्मांत्वंपरिपृष्टवान्।मंगलंमरुतांजन्म

भूयः कथयामि ते।७८॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे मरुद्गणोत्पत्तिर्नामाष्टा-
दशोऽध्यायः॥ ॥१८॥ ॥ऊनविंशेऽत्र यत्प्रोक्तं कश्यपेन दितेर्व्रतं। तद्देवविहितं लोकहिताय
हरितोषणं॥ राजोवाच॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितं। विधिं वेदितुमिच्छामि येन वि-
ष्णुः प्रसीदति॥ तस्यैव व्रतस्य विधिं प्रकारं येन विधिना विष्णुः प्रसीदति॥१॥ श्रीशुक उवाच॥
शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया। आरभेत व्रतमिदं सार्वकामिकमादितः।२ मार्गशि- षटी·
रमासि शुक्लपक्षे आदितः प्रतिपदि॥ निशाम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च। स्नात्वा १५५
शुक्लदती शुक्ले वसीतालंकृतांबरा।३ अनुमंत्र्य पृष्ट्वा। शुक्ला दंता यस्याः सा शुक्लदती धौतदं-

ता। अलंकृता सती पूजयेत्। आदौ तावन्नमस्कारमंत्रानाह॥ अलमिति त्रिभिः। अलं ते नि-
रपेक्षाय पूर्णकाम नमोस्तु ते। महाविभूतिपतये नमः सकलसिद्धये।४ त्वं अलं पर्याप्तमेव
सर्वं। न किंचिदन्यैः साध्यमस्ति। अतः केवलं ते तुभ्यं नमोस्तु। पर्याप्तौ हेतवः। निरपेक्षाय हे पू-
र्णकाम। महाविभूतिपतये सकलाः सिद्धयोऽणिमाद्या यस्मिन् तस्मै।४। यथा त्वं कृपया
भूत्या तेजसा महिमौजसा। जुष्ट ईशगुणैः सर्वैस्ततोसि भगवान्प्रभुः।५ यादीशा यस्मात्त्वं
कृपया भूत्या तेजसा महिम्नौजसा जुष्टः तस्माद्भगवान् असि।५। विष्णुपत्नि महामाये महापु-
रुषलक्षणे। प्रीयेथा मे महाभागे लोकमातर्नमोस्तु ते।६ महापुरुषस्य परमेश्वरस्य लक्ष-

णानि निरपेक्षत्वादीतियस्याः तस्याः संबोधनं पूजामंत्रमाह ॥७॥ ॐ नमो भगवते महापुरु
षाय महानुभावाय महाविभूतिपतये महाविभूतिभिः सह बलिमुपहराणि ॥ ति ॥ अनेन मं
त्रेण अहरहः विमोहवादनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधू
पदीपोपहाराद्युपचारांश्च समाहितोपाहरेत् ॥८॥ हविःशेषं तु जुहुयादनले द्वादशा
हुतीः । पायसं मधुसर्पी विफलां श्वेकरुउसंख्यवान् ॥९॥ हविःशेषं उपहारावशिष्टं पायसा
दि तु जुहुयात् होममंत्रमेव दर्शयति ॥१०॥ ॐ नमो भगवते महापुरुषाय महाविभूतिपतये
स्वाहेति ॥ ९ श्रियं च विष्णुं वरदावाशिषां प्रभवावुभौ । भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसं षटी॰ २५६

पदः ॥१०॥ प्रकर्षेणाभवं त्वां स्वामिति त्रयवौ ॥७॥ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा । दश
वारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ॥११॥ युवां तु विश्वस्य विभू जगतः कारणं परं । इयं हि प्रकृतिः
सूक्ष्मा मायाशक्तिर्दुरत्यया ॥१२॥ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः । त्वं सर्वयज्ञ इज्ये
यं क्रियेयं फलभुग्भवान् ॥१३॥ इज्या यज्ञनिवर्तकः ॥ उरुरूपव्यापारो भावनास्य ः क्रियात्मा ॥
किकी ॥७॥ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् । त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रि
याशया ॥१४॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः । यथा युवां त्रिलोकस्य वरदौ परमेष्ठि
नौ । तथा म उत्तमश्लोक संतु सत्या महाशिषः ॥१५॥ प्रत्ययो नामरूपयोः प्रकाशः । अपाश्र

यः तयोराधारः॥ ॥ इत्यपि निष्ठूय वरदंष्ट्रा निवासं श्रियामदः प्रणमेद्दंडवत्पश्चात्प्रबध
करसंपुटः॥१६ तन्निःस्मार्योपसरणं दद्याचमनमर्घ्यं यत् यज्ञोच्छिष्टमवघ्राय भुंजतेरत्य
र्चयेद्धरिं॥१७ पतिं च परया भक्त्या महापुरुषचेतसा। प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं
पतिः॥१८ महापुरुषचेतसा ईश्वरबुध्या उपनमेत् भजेत् पतिश्च स्वयं प्रेमशीलः सन्नक
र्माणि विदृयात्॥ ॥ विद्यात्सर्वकर्माणि पत्न्या उच्चावचानि च। आहृतमेकतरेणापि दंपत्यो षटा· २५७
रुभयोर्भवेत्। पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः॥२० यतः दंपत्योर्मध्ये एकतरेणकृ
तं उभयोरपि फलं भवति॥ ॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन। विप्रान् स्त्रियो

वीरवतीश्च गंधबलिमंडनैः॥२१ न विहन्यात् न विच्छिंद्यात्॥ ॥ अर्चेद्दहरहर्भक्त्या देवं नि
यममास्थितः। उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः॥ अद्यादात्मविशुध्यर्थं सर्वकमर्ध
येत तथा॥२२ स्वस्य यत् निवेदितं नैवेद्यं पायसादि तथा यत् कृतशेषं तत् अद्यात् भोजये
त्॥ ॥ एतेन पूजाविधिना मासान्द्वादश हायनं। नीत्वाथोपरमेत्साध्वी कार्तिके चरमेऽहनि
॥२३ द्वादशमासानित्युक्ते कदाचित् न्यूनमध्ये मलमासे समतिते न स्यात् द्वादशसंख्यायां मल्पांश्च
वत्सैकस्यत्यागः स्यात् हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि संगात् तदुभयं वारयि
तुमुभयमुक्तं। त्रयोदशमासान् अपि कुर्यादित्यर्थः॥ ॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य

पूर्ववत्।पयःसृतेनतुकुर्यात्नवकृष्णासद्मपर्षिषा।पाकयज्ञविधानेनयादशौवाजतीःप
तिः।२५श्लोन्नूतेषुप्रजातेमसिपयसिसृतेनपक्वेनपाकयज्ञविधानेन।७।आशिषःशिर।
सांद्रायद्विजैःप्रीतैःसमीरिता।प्रणम्यशिरसाभक्त्याभुंजीततदनुज्ञया।२६।आचार्यमथ
त्वावाग्यतःसहबंधुभिः।दद्यात्पत्न्यैचरोःशेषंसुप्रजास्त्वंसुभगं।२७।सुप्रजास्त्वंसुतप्रद
मित्यर्थः।७।एतच्चरित्वाविधिवत्विप्रोव्रतं।स्त्रीभिःप्सितार्थंलभतेउमातिद्ध।स्त्रियेतदास्थाय
लभेतसौभाग्यंश्रियंप्रजांजीवपतिंयशोऽहरात्।२८।कन्यापिविंदेतवरमग्र्यंलक्षणंपतिंचवी
राहतकिल्बिषागतिं।सुतप्रजाजीवसुताधनेश्वरीसुदुर्भगासुभगासुभेद्रूपमग्र्यं।२९।स्त्र

प.टी. १५८

वीराविधवाधनेश्वरीसत्यपियादुर्भगासासुभगाभवति।७।विंदेद्विरूपाविरुजाविमुच्य
तेयस्मामयाद्वीडियकल्पदेहं।एतस्यव्रतस्युदयेनकर्मण्यपनंतत्तृप्तिःपतिदेवतानां।३०।यः
स्त्रीवयावीरोगीसाप्येतद्व्रतकरणात्विरुजाविमिष्टयारुजाविमुच्यते।विरूपारूपवती
स्यात्।एदैतेध्यसयपठनात्तथाश्रवणात्इंद्रियैःसहितंकल्यंदेहंचविंदेदितिशेषः।विप्रा
णांतुजनौतुरतोयःपठन्वर्ततेतस्यपितॄणांदेवतानांचअनंतातृप्तिर्भवतीति।७।।तुष्टाःप्र
यच्छंतिसमस्तकामान्होमावसानेकृततुष्टश्रीहरिश्च।राजन्महत्सुकुलांजन्मधुपर्णंदि
तेर्व्रतंचायत्प्रदिष्टंमहत्तेः।३१।तथातेपितृदेवतादयःतुष्टाःसंतःसमस्तकामान्दिशंति।ज

तत्तत्कुर्वंतिःस्त्रीर्लक्ष्मीर्हरिश्चतुष्टाःसंतःवांछितंप्रदिशंति॥छ॥ इतिश्रीभागवतेम
हापुराणेष्टादशसाहस्र्यांसंहितायांषष्टस्कंधेपुंसवनव्रतविधिकथनेएकोनविंशो
ध्यायः॥ ॥छ॥ ॥समाप्तःषष्टस्कंधः॥ ॥छ॥शुभंभवतुलेखकपाठकयोः॥ ॥छ॥ ॥छ॥
संवत् १५६४॥ संवत् १६९८ वर्षे वैशाषमासे शुक्लपक्षे १०ऽगेशिलिखितमिति॥ ॥छ॥
॥ ॥छ॥ ॥श्रीरामजयजय॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥श्री॥ ॥श्री॥